अथ कल्पोक्त

॥ नवदुर्गासहस्रनामप्रारंभः ॥



स्वस्ति ॥ श्री गणेशाय नमः ॥ अथ कल्पोक्तनवदुर्गासहस्त्र नामपूजाविधिः ॥ योगनिद्रा देवजाता महिषासुरमर्दिनी ॥ शैलजा धूम्रहा चंडमुंडहा रक्तबीजहा ॥ निशुंभशुंभहा चेति नवदुर्गाः प्रकीर्तिताः ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य एवं गुणेत्या दिचतुर्विधफलपुरुषार्थफलसिध्यर्थं ममेह जन्मनि जन्मांतरे च सर्वो पद्रवशांति पूर्वकदीर्घायुर्विपुलधन पुत्रपौत्राद्यनवच्छिन्न संततिवृद्धिस्थिर लक्ष्मीकीर्तिलाभशत्रुपराजयसर्वाभीष्टसिध्यर्थं नवरात्रिप्रतिपद्यादिविहित योगनिद्रादि दुर्गामूर्तिप्रीत्यर्थं कल्पोक्तपूजापूर्वक सहस्त्रनामपूजां करिष्ये॥ इति संकल्प्य गणपतिं प्रार्थ्य, तदंगभूशुध्यादि कलशस्थापनकलशार्चन-शंखार्चनात्मार्चनानिच कृत्वा, द्वारपालपूजां कुर्यात् ॥ पूर्वद्वारे द्वारलक्ष्म्यै नमः ॥ धात्रे० ॥ विधात्रे० ॥ दक्षिणद्वारे द्वारलक्ष्म्यै० ॥ चंडाय० ॥

प्रचंडाय० ॥ पश्चिमद्वारे द्वारलक्ष्म्यै० ॥ जयाय० ॥ विजयाय० ॥ उत्तर
द्वारे द्वारलक्ष्म्यै० ॥ दुर्गायै० ॥ विघ्नेश्वराय नमः ॥ इति द्वारपाल-
देवताभ्यो नमः ॥ ध्यानाद्युपचारान् समर्पयामि ॥ श्री ॥ दुर्गासूक्तेना
भिषेकं कुर्यात् ॥ अथ प्रतिपदि योगनिद्रा दुर्गापूजां कुर्यात् ॥
आधारादि पीठपूजां कृत्वा, नवशक्ति पूजां करिष्ये ॥ योगनि-
द्रायै नमः ॥ देवजातायै० ॥ महिषासुरमर्दिन्यै० ॥ शैलजायै० ॥
धूम्रहायै० ॥ चंडमुंडहायै० ॥ रक्तबीजहायै० ॥ निशुंभहायै० ॥ शुंभ-
हायै नमः ॥ इति नवशक्तिदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥
रक्तवर्णां गजारूढां रक्तमाल्यांबरांशुकां ॥ चतुर्भुजां शक्तिशूलगदा
भयधारिणीं ॥ देवीं समर्चयेद्धीमान् प्रथमायां विशेषतः ॥ ॐ नमो ॥ २ ॥
भगवत्यै सर्वभूतात्मिकायै सकलगुणशक्तियुक्तायै योगपद्मपीठा

त्मिकायै नमः ॥ सुवर्णपीठं कल्पयामि ॥ स्वात्मसंस्थामजां शुद्धां त्वामद्य
परमेश्वरि ॥ अरण्यामिव हव्याशं मूर्तावावाहयाम्यहं ॥ ओं भूर्भुवःसु
वरों॥ सशक्तिसांगसायुधसवाहनसपरिवारसर्वालंकारभूषितश्रीयोगनिद्रा-
दुर्गापरमेश्वरि अत्रागच्छावाहयिष्ये ॥ आवाहयामि ॥ आवाहिता भव ॥
संस्थापिता भव ॥ सन्निहिता भव ॥ सन्निरुद्धा भव ॥ अवकुंठिता
भव ॥ सुप्रसन्ना भव ॥ क्षमस्व सान्निध्यं कुरु ॥ कात्यायनाय विद्महे
कन्यकुमारि धीमहि ॥ तन्नो दुर्गिः प्रचोदयात् ॥ इदमर्घ्यं ॥ मरीचि-
काश्यप ऋषिः, त्रिष्टुप छंदः, दुर्गा देवता ॥ जातवेदसे सुनवाम
अंगु० ॥ सोममरातीयतः, तर्जनी० ॥ निदहाति वेदः मध्यमा० ॥
सनः पर्षदति, अनामिका० ॥ दुर्गाणि विश्वा नावेव, कनिष्ठिका० ॥
2 सिंधुं दुरितात्यग्निः, करतल० ॥ एवं हृदयादि न्यासः ॥ भूर्भुवःसुवरो-

मिति दिग्बंधः ॥ ध्यानं ॥ हेमप्रख्यामिंदुखंडात्तमौलिं शंखारिष्टां भीतिहस्तां त्रिणेत्रां ॥ हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ॥ इति ध्यानं ॥ जातवेदसे सुनुवाम सोममरातीयतो निदहाति वेदः ॥ सनः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः ॥ इति जपं ॥ लं पृथिव्यात्मिकायै नमः इति पंचोपचारान् कृत्वावरणपूजां कुर्यात् ॥ अथ द्वादशनामपूजां करिष्ये ॥ प्रभायै नमः ॥ विजयायै० ॥ जयायै० ॥ शुद्धायै० ॥ विशुद्धायै० ॥ नंदिन्यै० ॥ भद्रायै० ॥ विद्यायै० ॥ सर्वसिद्धिप्रदायै० ॥ वज्रनखायै० ॥ दिव्यवाहनायै० ॥ सिंहवाहनायै नमः ॥ इति द्वादशनामपूजां समर्पयामि ॥ श्रीः ॥ अथ द्वितीयायां देवजाता दुर्गापूजां कुर्यात् ॥ आधारादि पीठपूजां कृत्वा ॥ नवशक्तिपूजां करिष्ये ॥ धनंजयायै नमः ॥ सुरश्रेष्ठायै० ॥

नंदात्मिकायै० ॥ द्विरदासनायै० ॥ वह्निजायै० ॥ रौद्र्यै० ॥ दुर्गायै० ॥ भीमायै० ॥ महालक्ष्म्यै नमः ॥ इति नवशक्तिदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ हंसारूढां शुक्लवर्णां शुक्लमाल्याद्यलंकृतां ॥ चतुर्भुजां स्रक्स्रुवौ च कमंडल्वक्षमालिकां ॥ बिभ्रतीं पूजयेद्देवीं द्वितीयायां सदा नृप ॥ ॐ नमो भगवत्यै=भूषित श्री देवजातादुर्गापरमेश्वरि अत्रागच्छावाहयिष्ये ॥ आवाहयामि ॥ आवाहनादिषण्मुद्राः प्रदर्श्य ॥ कात्यायनायेत्यादिषडंगांतं कृत्वा ॥ ध्यानं ॥ या माया मधुकैटभप्रमथिनी या माहिषोन्मर्दिनी या धूम्राक्षकचंडमुंडमथिनी या रक्तबीजाशनी ॥ या सा शुंभनिशुंभदैत्यदलिनी या सिद्धलक्ष्मी परा सा नित्या नवकोटिमूर्तिपरमा मां पातु दुर्गांबिका ॥ इति ध्यानं ॥ जातवेदस इति जपं ॥ अथ पंचोपचारान् कृत्वावरणपूजां कुर्यात् ॥ द्वादशनामपूजां करिष्ये ॥

अनेकरत्नरचितायै नमः ॥ देव्याः सिंहासनादिदेवतायै ० ॥ स्रग्धरायै ० ॥ मेधायै ० ॥ धृत्यै ० ॥ काल्यै ० ॥ भद्रकाल्यै ० ॥ अंबिकायै ० ॥ वेद-गर्भायै ० ॥ शिवदूत्यै ० ॥ शांभव्यै ० ॥ शंखचक्रधारिण्यै नमः ॥ इति द्वादशनामपूजां समर्पयामि ॥ श्रीः ॥ अथ तृतीयायां महिषासुर-मर्दिनी दुर्गापूजां कुर्यात् ॥ आधारादि पीठपूजां कृत्वा ॥ नवशक्ति-पूजां करिष्ये ॥ नंदायै नमः ॥ रक्तदंतिकायै० ॥ शाकंभर्यै० ॥ शताक्ष्यै० ॥ भ्रामर्यै० ॥ भीमायै० ॥ शिवदूत्यै० ॥ दुर्गायै० ॥ महा-लक्ष्म्यै नमः ॥ नवशक्तिदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ गौरांगीं द्विभुजां देवीं कमलद्वयधारिणीं ॥ सिंहारूढां तृतीयायां गौरांगीं तां प्रपूजयेत ॥ ॐ नमो भगवत्यै= भूषितश्रीमहिषासुरमर्दिनी दुर्गा परमेश्वरी अत्रागच्छावाहयिष्ये ॥ आवाहयामि ॥ आवाहनादि षण्मुद्राः

॥ ४ ॥

प्रदर्श्य ॥ कात्यायनेत्यादि षडंगांतं कृत्वा ॥ ध्यानं ॥ अक्षस्रक्कूशूलबाणां-कुशकुलिशगदाचक्ररुक्टंकसंज्ञां देवेढ्यां बाहुभिस्तां रुचिरविमलघंटोग्र-पाशान्वहंतीं ॥ शंखं चर्मासिचापं सदमृतलहरीपानपात्रं च कुंडीमाबि-भ्राणामजस्रं महिषविमथिनीं नौमि शक्तित्रयाख्यां ॥ इति ध्यानं ॥ जातवेदस इति जपं ॥ अथ पंचोपचारान् कृत्वावरणपूजां कुर्यात् ॥ द्वादशनामपूजां करिष्ये ॥ शंखधारिण्यै नमः ॥ चक्रधारिण्यै० ॥ खड्ग-धारिण्यै० ॥ वज्रधारिण्यै० ॥ अंकुशधारिण्य० ॥ त्रिशूलधारिण्यै० ॥ आर्यायै० ॥ दुर्गायै० ॥ वेदस्वरूपिण्यै० ॥ अंबिकायै० ॥ भद्रकाल्यै० ॥ महाकाल्यै नमः ॥ इति द्वादशनामपूजां समर्पयामि ॥ श्रीः ॥ अथ चतुर्थ्यां शैलजादुर्गापूजां कुर्यात् ॥ आधारादिपीठपूजां कृत्वा नवशक्ति-पूजां करिष्ये ॥ कौशिक्यै नमः ॥ महिषासुरमर्दिन्यै० ॥ सर्वशक्तिसम-

न्वितायै० ॥ सर्वस्वरूपिण्यै० ॥ कौमार्यै० ॥ अंबिकायै० ॥ वेदगर्भायै० ॥
महालक्ष्म्यै० ॥ विंध्याचलवासिन्यै नमः ॥ इति नवशक्तिदेवताभ्यो
नमः ॥ ध्यानाद्युपचारान्० ॥ रक्तवर्णा चतुर्बाहुं रक्तवस्त्राद्यलंकृतां ॥
पाशांकुशां मातुलिंगधरां मूषकवाहिनीं ॥ ॐ नमो भगवत्यै= भूषित-
श्रीशैलजादुर्गापरमेश्वरि अत्रागच्छावाहयिष्ये ॥ आवाहयामि ॥ आवा-
हनादिषण्मुद्राः प्रदर्श्य ॥ कात्यायनेत्यादि षडंगांतं कृत्वा ॥ ध्यानं ॥
शखारिचापशरभिन्नकरां त्रिणेत्रां तिग्मेतरांशुकलया विलसत्किरीटां ॥
सिंहस्थितां ससुरसिद्धनतां च दुर्गां दूर्वानिभां दुरितवर्गहरां नमामि ॥
इति ध्यानं ॥ जातवेदस इति जपं ॥ अथ पंचोपचारान् कृत्वावरणपूजां
कुर्यात् ॥ द्वादशनामपूजां करिष्ये ॥ कौमार्यै नमः ॥ क्षेमकार्यै० ॥
विंध्याचलवासिन्यै० ॥ शुंभनिषूदिन्यै० ॥ निशुंभनिषूदिन्यै नमः ॥

महिषासुरमर्दिन्यै० ॥ चंडमुंडनिहंत्र्यै० ॥ रक्तबीजनिहंत्र्यै नमः ॥
जलदुर्गायै० ॥ स्थळदुर्गायै० ॥ वनदुर्गायै० ॥ अग्निदुर्गायै नमः ॥ इति
द्वादशनामपूजां समर्पयामि ॥ श्रीः ॥ अथ पंचम्यां धूम्रहादुर्गापूजां
कुर्यात् ॥ आधारादिपीठपूजां कृत्वा ॥ नवशक्तिपूजां करिष्ये ॥
कौमार्यै नमः ॥ त्रिमूर्त्यै० ॥ कल्याण्यै० ॥ रोहिण्यै० ॥ काल्यै० ॥ चंडि
कायै० ॥ शाकंभर्यै० ॥ दुर्गायै० ॥ सुभद्रायै नमः ॥ इति नवशक्तिदेव
ताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ चतुर्भुजां सुवर्णाभां शंखचक्रगदां-
बुजां ॥ पंचम्यां पूजयेदेवीं सदा मकरवाहिनीं ॥ ॐ नमो भगवत्यै=
भूषितश्रीधूम्रहादुर्गापरमेश्वरि अत्रागच्छावाहयिष्ये ॥ आवाहयामि ॥
आवाहनादिषण्मुद्राः प्रदर्श्य ॥ कात्यायनेत्यादि षडंगांतं कृत्वा ॥
ध्यानं ॥ मातर्मे मधुकैटभघ्नमहिषप्राणापहारे यमे हेलालंबितधूम्रलोचनवधे

हे चंडमुंडार्दिनि ॥ निःशेषे कृतरक्तबीजदनुजे नित्ये निशुंभापहे शुंभध्वंसिनि केशिनामदुरिते दुर्गे नमस्तेंऽबिके ॥ इति ध्यानं ॥ जातवेदस इति जपं ॥ अथ पंचोपचारान् कृत्वावरणपूजां कुर्यात् ॥ द्वादशनामपूजां करिष्ये ॥ अनेकभेदभंजिन्यै नमः ॥ दुर्गामूर्त्यै० ॥ अष्टादशभुजबलविध्वंसिन्यै० ॥ तापत्रयविध्वंसिन्यै० ॥ शत्रुभंजिन्यै० ॥ सर्वसंपत्प्रदायिन्यै० ॥ सर्वारिष्टविनाशिन्यै० ॥ त्रिदशवंदितायै० ॥ सर्ववेदस्वरूपिण्यै० ॥ शाकंभर्यै० ॥ रक्तदंतिकायै० ॥ अतिसौम्यायै नमः ॥ इति द्वादशनामपूजां समर्पयामि ॥ श्रीः ॥ अथ षष्ठयां चंडमुंडहादुर्गापूजां कुर्यात् ॥ आधारादिपीठपूजां कृत्वा ॥ नवशक्तिपूजां करिष्ये ॥ गजारूढायै नमः ॥ हंसारूढायै० ॥ सिंहारूढायै० ॥ मूषकवाहिन्यै० ॥ मयूरवाहिन्यै० ॥ मकरवाहिन्यै० ॥ रथारूढायै० ॥ वृषारूढायै० ॥ पंचानन- ॥ ६ ॥

वाहिन्यै नमः ॥ इति नवशक्तिदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ स्वर्णवस्त्राद्यलंकारैः स्फटिकैरुपशोभितां ॥ बाणकोदंडखेटं च शक्तिं चैव धृतां करे ॥ मयूरवाहिनीं देवीं षष्ठ्यां संपूजयेन्नृप ॥ ॐ नमो भगवत्यै=भूषित श्रीचंडमुंडहादुर्गापरमेश्वरि अत्रागच्छावाहयिष्ये ॥ आवाहयामि ॥ आवाहनादिषण्मुद्राः प्रदर्श्य ॥ कात्यायनायेत्यादिषडंगांतं कृत्वा ॥ ध्यानं ॥ अरिशंखकृपाणखेटबाणान् सधनुःशूलकतर्जनी दधाना ॥ भवती महिषोत्तमांगसंस्था नवदूर्वा सदृशी ॥ श्रियैस्तु दुर्गा ॥ इति ध्यानं ॥ जातवेदस इति जपं ॥ अथ पंचोपचारान् कृत्वावरणपूजां कुर्यात् ॥ द्वादशनामपूजां करिष्ये ॥ ख्यात्यै नमः ॥ जगत्प्रतिष्ठायै० ॥ जगद्धितायै० ॥ भीमायै० ॥ देव्यै० ॥ शिवायै० ॥ प्रकृत्यै० ॥ भद्रायै० ॥ कल्याण्यै० ॥ प्रणतकामधेनवे० ॥ विषप्रियायै० ॥ श्रीमहालक्ष्म्यै नमः ॥

इति द्वादशनामपूजां समर्पयामि ॥ श्रीः ॥ अथ सप्तम्यां रक्तबीजहादुर्गा-
पूजां कुर्यात् ॥ आधारादिपीठपूजां कृत्वा ॥ नवशक्तिपूजां करिष्ये ॥ रक्त-
वर्णायै नमः ॥ शुक्लवर्णायै० ॥ गौरवर्णायै० ॥ रौद्रवर्णायै० ॥ स्वर्ण-
वर्णायै० ॥ कोकनदवर्णायै० ॥ शिववर्णायै० ॥ शोणितवर्णायै० ॥ सर्व-
वर्णायै नमः ॥ इति नवशक्तिदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥
रक्तवर्णाद्यलंकारां द्विभुजांबुजधारिणीं ॥ सप्तम्यां पूजयेद्देवीं रथारूढां
प्रयत्नतः ॥ ओं नमो भगवत्यै भूषित श्रीरक्तबीजहादुर्गापरमेश्वरि अत्रा-
गच्छावाहयिष्ये ॥ आवाहयामि ॥ आवाहनादिषण्मुद्राः प्रदर्श्य ॥
कात्यायनायेत्यादि षडंगांतं कृत्वा ॥ ध्यानं ॥ रक्ताडंबरमंबरां विलसितां
संहारदंष्ट्रोल्लसज्जृंभीनादकरीं कपालरुदरीं रक्तांबरां धारिणीं ॥ शूल-
ज्वालकपालरक्तनयनां कंकाळवीणाधरीं देवीं दिव्यदिगंबरप्रमथिनीं संहार

पारायणीं ॥ इति ध्यानं ॥ जातवेदस इति जपं ॥ अथ पंचोपचारान्
कृत्वावरणपूजां कुर्यात् ॥ द्वादशनामपूजां करिष्ये ॥ चेतनेष्टिकायै नमः ॥
जगदात्मशक्त्यै० ॥ चंडिकायै० ॥ अंबिकायै० ॥ सुरूपिण्यै० ॥ सर्वा-
श्रयायै० ॥ स्वाहायै० ॥ स्वधायै० ॥ विद्यायै० ॥ सर्वात्मिकायै० ॥
मेधायै० ॥ परार्तिहारिण्यै० ॥ इतिद्वादशनामपूजां समर्पयामि ॥ श्रीः ॥
अथाष्टम्यां निशुंभहादुर्गापूजां कुर्यात् ॥ आधारादिपीठपूजां कृत्वा ॥
नवशक्तिपूजां करिष्ये ॥ शक्तिशूलगदामभयधारिण्यै नमः ॥ स्रुक्स्रुव-
कमंडलुधारिण्यै० ॥ कपालधारिण्यै० ॥ पाशांकुशमातुलिंगधारिण्यै० ॥
बाणकोदंडशक्तिधारिण्यै० ॥ अंबुजद्वयधारिण्यै० ॥ त्रिशूलडमरुगजचर्म-
खट्वांगधारिण्यै० ॥ कमंडल्वादिधारिण्यै० ॥ स्वरूपधारिण्यै नमः ॥ इति
नवशक्तिदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ श्वेतवस्त्राद्यलंकारैर्भू-

दुर्गा

॥ ८ ॥

षितां च चतुर्भुजां ॥ त्रिशूलं डमरुं चैव रथांगं शूलमेव च ॥ कुठारं
शंखपूर्णं च पाशाशक्तिं च यष्टिकां ॥ खेटं शरासनं चक्रं कमंडलुधृतां
शुभां ॥ स्वरूपधारिणीमेवमष्टम्यां पूजयेत्सदा ॥ ॐ नमो भगवत्यै=
भूषितश्रीनिशुंभमहादुर्गापरमेश्वरि अत्रागच्छावाहयिष्ये ॥ आवाह-
यामि ॥ आवाहनादिषण्मुद्राः प्रदर्श्य ॥ कात्यायनायेत्यादि षडंगांतं कृत्वा ॥
ध्यानं ॥ महिषमस्तकनृत्तविनोदिनी स्फुटरणन्मणिनूपुरमेखला ॥ जनन-
रक्षणमोक्षविधायिनी जयतु शुंभनिशुंभनिषूदिनी ॥ इति ध्यानं ॥ जात-
वेदस इति जपं ॥ अथ पंचोपचारान् कृत्वावरणपूजां कुर्यात् ॥ द्वादश-
नामपूजां करिष्ये ॥ शशिन्यै नमः ॥ महारात्र्यै० ॥ दारुणायै० ॥ क्लेश-
हारिण्यै० ॥ दारिद्र्यदुःखहारिण्यै० ॥ तापत्रयविध्वंसिन्यै० ॥ महा-
मायायै० ॥ महालक्ष्म्यै० ॥ सर्वस्वरूपिण्यै० ॥ दुर्गायै० ॥ विभूत्यै० ॥

सह

॥ ८ ॥

अंबिकायै नमः ॥ इति द्वादशनामपूजां समर्पयामि ॥ श्रीः ॥ अथ
नवम्यां शुंभमहादुर्गापूजां कुर्यात् ॥ आधारादि पीठपूजां कृत्वा ॥ नव-
शक्तिपूजां करिष्ये ॥ प्रभायै नमः ॥ मायायै० ॥ जयायै० ॥ सूक्ष्मायै० ॥
शुद्धायै० ॥ नंदिन्यै० ॥ सुप्रभायै० ॥ विजयायै० ॥ सर्वसिद्धिदायै
नमः ॥ इति नवशक्तिदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ त्रिणेत्रां
चंद्रचूडां च मुकुटेनोपशोभितां ॥ सूर्यकोटिप्रतीकाशां महिषासुर-
मर्दिनीं ॥ सिंहारूढां महादुर्गां त्रिदशैरपि पूजितां ॥ नवम्यां पूजयेद्देवी
मभीष्टफलदायिनीं ॥ ओं नमो भगवत्यै– भूषितश्रीशुंभमहादुर्गापरमेश्वरि
अत्रागच्छावाहयिष्ये ॥ आवाहयामि ॥ आवाहनादिषण्मुद्राः प्रदर्श्य ॥
कात्यायनायेत्यादि षडंगांतं कृत्वा ॥ ध्यानं ॥ श्वेतांभोजात्तवासां शर-
मुसलधरां चक्रपाशं च घंटां बाहुभ्यां लांगुलेष्टांसलयुतमनिशं बिभ्रतीं

5

कुंदवर्णा ॥ नित्यानंदां निरीहां निरुपमचरितां शुंभहंत्रीं दयार्द्रां नित्यं ध्यायेत्सरस्वत्यभिधृतकनकां कल्पजालाकुलांगीं ॥ इति ध्यानं ॥ जातवेदस इति जपं ॥ अथ पंचोपचारान् कुर्यात् ॥ आवरणपूजां करिष्ये ॥ प्रथमावरणं ॥ जातवेदसे सुनुवाम, हृदयाय नमः ॥ सोममरातीयतः, शिरसे नमः ॥ निदहाति वेदः, शिखायै नमः ॥ सनः पर्षदति, कवचाय नमः ॥ दुर्गाणि विश्वानावेव, नेत्रत्रयाय नमः ॥ सिंधुं दुरितात्यग्निः, अस्त्राय नमः ॥ इति प्रथमावरणदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ अथ द्वितीयावरणं ॥ निवृत्त्यात्मने नमः ॥ प्रतिष्ठात्मने० ॥ विद्यात्मने० ॥ शांत्यात्मने० ॥ पृथिव्यात्मने० ॥ अचलात्मने० ॥ आकाशात्मने० ॥ इति द्वितीयावरणदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ अथ तृतीयावरणं ॥ अग्नये सप्तजिह्वाय नमः ॥ अग्नये हव्यवाहनाय० ॥

अग्नये वैश्वानराय० ॥ अग्नये कौमारतेजसे० ॥ अग्नये विश्वमुखाय० ॥ अग्नये देवमुखाय० ॥ अग्नये जातवेदसे० ॥ इति तृतीयावरणदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ अथ चतुर्थावरणं ॥ जाग्रतायै नमः ॥ तापिन्यै० ॥ दहनरूपिण्यै० ॥ वागीश्वर्यै० ॥ मदनवाहनायै० ॥ सोमरूपायै० ॥ मनोजवायै० ॥ मरुद्वेगायै० ॥ रात्रिसंज्ञितायै० ॥ तीव्रकोपायै० ॥ यशोवत्यै० ॥ तोयात्मिकायै० ॥ नित्यात्मिकायै० ॥ दयात्मिकायै० ॥ हारिण्यै० ॥ तिरस्क्रियायै० ॥ वेदमात्रे० ॥ जमदग्निप्रियायै० ॥ समाराध्यै० ॥ नंदिन्यै० ॥ चरायै० ॥ रिपुमर्दिन्यै० ॥ श्रेष्टिन्यै० ॥ दंडिन्यै० ॥ तिग्मायै० ॥ दुर्गायै० ॥ गायत्रिसंज्ञितायै० ॥ निरविद्यायै० ॥ विशालाक्ष्यै० ॥ श्वासोद्वाहनायै० ॥ वेदनायै० ॥ वन्हिगर्भायै० ॥ सिंहवाहनायै० ॥ रोषायै० ॥ सपत्नायै० ॥ इति चतुर्थावरणदेवताभ्यो नमः ॥

ध्यानाद्युपचारान्० ॥ अथ पंचमावरणं ॥ ब्राह्म्यै नमः ॥ माहेश्वर्यै० ॥ कौमार्यै० ॥ वैष्णव्यै० ॥ वाराह्यै० ॥ इंद्राण्यै० ॥ चामुंडायै० ॥ महालक्ष्म्यै० ॥ इति चतुर्थावरणदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ अथ पंचमावरणं ॥ ब्राह्म्यै नमः ॥ माहेश्वर्यै० ॥ कौमार्यै० ॥ वैष्णव्यै० ॥ वाराह्यै० ॥ इंद्राण्यै० ॥ चामुंडायै० ॥ महालक्ष्म्यै० ॥ इति पंचमावरणदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ अथ षष्ठावरणं ॥ ॐ इंद्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावतगजवाहनाय सशक्तिसांगसायुधसवाहनसपरिवाराय श्रीदुर्गापार्षदाय नमः ॥ अं अग्नये तेजोधिपतये रक्तवर्णाय शक्तिहस्ताय मेषवाहनाय सशक्ति० ॥ यं यमाय प्रेताधिपतये कृष्णवर्णाय दंडहस्ताय महिषवाहनाय सशक्ति० ॥ क्षं निर्ऋतये रक्षोधिपतये धूम्रवर्णाय खड्गहस्ताय नरवाहनाय सशक्ति० ॥ वं वरुणाय

जलाधिपतये शुक्लवर्णाय पाशहस्ताय मकरवाहनाय सशक्ति० ॥ ॐ वायवे प्राणाधिपतये धूम्रवर्णाय अंकुशहस्ताय मृगवाहनाय सशक्ति० ॥ सं सोमाय नक्षत्राधिपतये सितवर्णाय गदाहस्ताय अश्ववाहनाय सशक्ति० ॥ इं ईशानाय विद्याधिपतये शुभ्रवर्णाय शूलहस्ताय वृषभवाहनाय सशक्ति० ॥ अं अनंताय नागाधिपतये शुभ्रवर्णाय चक्रहस्ताय रथवाहनाय सशक्ति० ॥ कं ब्रह्मणे लोकाधिपतये अरुणवर्णाय पद्महस्ताय हंसवाहनाय सशक्तिसांगसायुज्यसवाहनसपरिवाराय श्री दुर्गापार्षदाय० ॥ इति षष्ठावरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथ सप्तमावरणं ॥ वज्राय नमः ॥ शक्तये० ॥ दंडाय० ॥ खड्गाय० ॥ पाशाय० ॥ अंकुशाय० ॥ गदायै० ॥ शूलाय० ॥ चक्राय० ॥ पद्माय० ॥ इति सप्तमा वरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथाष्टमावरणं० ॥ रथांगाय नमः ॥

दुर्गा शंखाय० ॥ चक्राय० ॥ गदायै० ॥ शराय० ॥ धनुषे० ॥ त्रिशूलाय० ॥ सह
इत्यष्टमावरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथ नवमावरणं ॥ सिंह- ॥ ११ ॥
भद्राय नमः ॥ हिमाचलाय० ॥ मेरवे० ॥ त्रिकूटाय० ॥ पारिजाताय० ॥
गंधमादनाय० ॥ मलयाचलाय० ॥ दुर्धर्षाय० ॥ संजीविन्यै० ॥ इति
नवमावरणदेवताभ्यो नमः ॥ ध्यानाद्युपचारान् समर्पयामि ॥ इत्यावरण-
पूजां समर्पयामि ॥ अथ द्वादशनामपूजां करिष्ये ॥ शिवदूत्यै नमः ॥
काळरात्र्यै० ॥ नंदायै० ॥ परमेश्वर्यै० ॥ भ्रामर्यै० ॥ दुर्गायै० ॥ रक्तदं-
तिकायै० ॥ शतेक्षणायै० ॥ भीमायै० ॥ महारात्र्यै० ॥ एकवीरायै० ॥
कालिकाय नमः ॥ इति द्वादशनामपूजां समर्पयामि ॥ श्री ॥ अथ षोड-
शोपचारपूजां करिष्ये ॥ महिषघ्नीं बहुभुजां कुमारीं सिंहवाहिनीं ॥
॥ ११ ॥ प्रसन्नवदनां ध्यायेत्सर्वाभरणभूषितां ॥ सर्वाभरणभूषितायै नमः ॥

ध्यानं समर्पयामि ॥ १ ॥ जयंति मंगले काळि भद्रकाळि कपालिनि ॥
दुर्गे क्षमे शिवे धात्रि स्वधे स्वाहे नमोऽस्तु ते ॥ स्वाहायै० ॥ आवा-
हनं ॥ २ ॥ सुवर्णरत्नसंयुक्तं शतसूर्यसमप्रभं ॥ आसनं गृह्यतां देवि
कात्यायनि नमोऽस्तु ते ॥ कात्यायन्यै० ॥ आसनं० ॥ ३ ॥ सर्वस्वरूपे
सर्वेशि सर्वशक्तिसमन्विते ॥ कृतांजलिपुटो भूत्वा स्वागतं कल्पया-
म्यहं ॥ सर्वशक्तिसमन्वितायै० ॥ स्वागतं० ॥ ४ ॥ महालक्ष्मि महामाये
महाविद्यास्वरूपिणि ॥ मया दत्तामिदं पाद्यं गृहाण परमेश्वरि ॥ परमे-
श्वर्यै० ॥ पाद्यं० ॥ ५ ॥ अष्टगंधसमायुक्तं बिल्वपत्रसमन्वितं ॥ अर्घ्यं
गृहाण देवेशि सर्वपापहरा भव ॥ सर्वपापहरायै० ॥ अर्घ्यं० ॥ ६ ॥
महादुर्गे महामाये भक्ताभीष्टफलप्रदे ॥ ददाम्याचमनं तुभ्यं शांभव्यै ते
नमो नमः ॥ शांभव्यै० ॥ आचमनं० ॥ ७ ॥ नवाज्यमधुसंयुक्तं शर्करा-

दधिसंयुतं ॥ मधुपर्कं ददामीशे तुभ्यं शंकरवल्लभे ॥ शंकरवल्लभायै० ॥ मधुपर्कं० ॥ ८ ॥ क्षीरं दध्याज्यमधुभिः शर्करादिसमन्वितं ॥ पंचामृतं गृहाणेशे दुर्गे गंगोदकान्वितं ॥ दुर्गायै० ॥ पंचामृतस्नानं० ॥ ९ ॥ ज्ञानरूपे भद्रकाळि दिव्यदीप्ति सुरेश्वरि ॥ स्नानं च कुरु दुर्गे त्वं नारायणि नमोऽस्तु ते ॥ नारायण्यै० ॥ शुद्धोदकस्नानं० ॥ १० ॥ विश्वेश्वरि नमस्तेऽस्तु विश्वाधारे शुभे शिवे ॥ पुनराचमनं देवि सर्वैश्वर्यप्रदा भव ॥ देव्यै० ॥ पुनराचमनं ॥ ११ ॥ वस्त्रं गृहाण देवेशि देवांगसदृशं नवं ॥ नानावर्णविचित्राढ्यं सर्वसौख्यप्रदा भव ॥ सर्वसौख्यप्रदायै० ॥ वस्त्रयुग्मं० ॥ १२ ॥ सुरासुरशिरोरत्नविराजितपदांबुजे ॥ अलंकारं गृहाणेशे नानारत्नसमन्वितं ॥ ईशायै० ॥ आभरणं० ॥ १३ ॥ गंधं चंदनसंमिश्रं कुंकुमादिसमन्वितं ॥ गृह्णीष्व देवि लोकेशि जगन्मातर्नमोऽस्तु ते ॥ जगन्मात्रे० ॥

गंधं० ॥ १४ ॥ सर्वाश्रये महामाये सर्वशक्तिसमन्विते ॥ अक्षतां स्त्वं महादेवि महादुर्गे शिवप्रिये ॥ शिवप्रियायै० ॥ अक्षतान्० ॥ १५ ॥ मालतीबिल्वमंदारद्रोणजातिविमिश्रितं ॥ पुष्पं गृहाण वरदे सर्वमंगलदा भव ॥ वरदायै नमः ॥ पुष्पाणि समर्पयामि ॥ १६ ॥ इति षोडशोपचारपूजां समर्पयामि ॥ अथांगपूजां करिष्ये ॥ जयंत्यै नमः ॥ विंध्यवासिन्यै नमः ॥ पादौ पूजयामि ॥ कमलिन्यै० ॥ जगद्वंदितायै० ॥ जंघे पू० ॥ कल्याण्यै० ॥ विक्रमायै० ॥ उरू० ॥ कात्यायन्यै० ॥ विकटदैत्यहारिण्यै० ॥ कटिं० ॥ सुरजनकायै० ॥ स्ववर्तनायै० ॥ उदरं० ॥ मंत्ररूपायै० ॥ मंत्रप्रियायै० ॥ वक्षस्थळं० ॥ दीर्घदेहायै० ॥ वृत्तकुचायै० ॥ स्तनौ० ॥ सर्वास्त्रधारिण्यै० ॥ चतुर्भुजायै० ॥ भुजान्० ॥ नानायुधविशारदायै० ॥ सर्वधारिण्यै० ॥ हस्तान्० ॥ धात्रे० ॥ दुर्गायै० ॥ कंठं० ॥ चामुंडायै० ॥

सुमुखायै० ॥ मुखं० ॥ भवान्यै० ॥ भवमोचनायै० ॥ शिरःपू० ॥ ब्रह्मादिदेववंदित मुकुटसंघट्टचरणनखमयूखायै० ॥ किरीटधारिण्यै० ॥ मुकुटं० ॥ श्रीमहाकाळिमहालक्ष्मिमहासरस्वत्यै नमः ॥ सर्वांगं पूजयामि ॥ इत्यंगपूजां समर्पयामि ॥ अथ पत्रपूजां करिष्ये ॥ दुर्गायै नमः ॥ बिल्वपत्रं समर्पयामि ॥ महिषासुरमर्दिन्यै० ॥ मालतीपत्रं० ॥ शूलिन्यै० ॥ भृंगराजपत्रं० ॥ त्रिविष्टपायै० ॥ मरुगपत्रं० ॥ कौमार्यै० ॥ चूतपत्रं० ॥ कराळ्यै० ॥ विष्णुक्रांतिपत्रं० ॥ भुवनेश्वर्यै० ॥ जातीपत्रं० ॥ जगद्योन्यै० ॥ कामतुळसीपत्रं० ॥ श्रीमहाकाळिमहालक्ष्मिमहासरस्वत्यै नमः ॥ सर्वपत्राणि समर्पयामि ॥ इति पत्रपूजां समर्पयामि ॥ अथ पुष्पपूजां करिष्ये ॥ इंद्रादिवंदितायै नमः ॥ सेवंतिकापुष्पं समर्पयामि ॥ जातिरूपरहितायै० ॥ जातिपुष्पं० ॥ निर्मलदेहायै० ॥ मल्लिकापुष्पं० ॥

कमलवासिन्यै० ॥ कमलपुष्पं० ॥ केतकहारिण्यै० ॥ केतकीपुष्पं० ॥ चंपकवासिन्यै० ॥ चंपकापुष्पं० ॥ अमरवंदितायै० ॥ मरुगपुष्पं० ॥ मुखप्रसन्नायै० ॥ मुडिवाळपुष्पं० ॥ श्रीमहाकाळिमहालक्ष्मिमहासरस्वत्यै नमः ॥ सर्वपुष्पाणि समर्पयामि ॥ इति पुष्पपूजां समर्पयामि ॥ श्री ॥ ओं अस्य श्रीदुर्गासहस्रनामस्तोत्रमंत्रस्य ॥ मरीचिकाश्यपऋषिः ॥ त्रिष्टुप् छंदः ॥ दुर्गा देवता ॥ जातवेदस इत्यादिषडंगं कृत्वा ॥ ध्यानं ॥ आबद्धहेममुकुटां मणिकुंडलोद्यत्केयूरकोर्पिरशनाढ्यनूपुराढ्यां ॥ ध्यायेद्धृताक्षयुगपाशवरांकुशेष्टां संपूज्य पुष्पविशिखां नवहेमवर्णां ॥ इति ध्यानं ॥ आत्मन्याधाय चात्मानमोंकारं मनसा स्मरन् ॥ आत्माष्टकसहस्रेण तुष्टाव परमेश्वरीं ॥ सर्वाभीष्टसिद्धिद्वारा श्री दुर्गापरमेश्वरीप्रीत्यर्थं सहस्रनामपूजां करिष्ये ॥

ॐ शिवायै नमः ॥
मायायै० ॥
रमायै० ॥
शक्तये० ॥
अनंतायै० ॥
निष्कळायै० ॥
अमलायै० ॥
शांतायै० ॥
माहेश्वर्यै० ॥
नित्यायै० ॥ १० ॥
शाश्वत्यै० ॥

परमायै० ॥
अक्षरायै० ॥
अचिंत्यायै० ॥
केवलायै० ॥
अनंतायै० ॥
शिवात्मने० ॥
परमात्मिकायै० ॥
अनाद्यै० ॥
अव्ययायै० ॥ २० ॥
शुद्धायै० ॥
सर्वज्ञायै० ॥

सर्वगायै० ॥
अचलायै० ॥
एकानेकविभागस्थायै०।
मायातीतायै० ॥
सुनिर्मलायै० ॥
महामहेश्वर्यै० ॥
सत्यायै० ॥
महादेव्यै० ॥ ३० ॥
निरंजनायै० ॥
काष्ठायै० ॥
सर्वांतरस्थायै० ॥

चिच्छक्तये० ॥
अतिलालसायै० ॥
तारायै० ॥
सर्वात्मिकायै० ॥
विद्यायै० ॥
ज्योतिरूपायै० ॥
अक्षरायै० ॥ ४० ॥
अमृतायै० ॥
शांत्यै० ॥
प्रतिष्ठायै० ॥
सर्वेषांनिवृत्तायै० ॥

अमृतप्रदायै० ॥
व्योममूर्तये० ॥
व्योमलयायै० ॥
व्योमाधारायै० ॥
अच्युतायै० ॥
अमलायै० ॥ ५० ॥
अनादिनिधनायै० ॥
अमोघायै० ॥
कारणात्मने० ॥
कलाकुलायै० ॥
ऋतुप्रथमजानाभ्यै० ॥

अमृतास्यायै० ॥
आत्मसंश्रयायै० ॥
प्राणेश्वरप्रियायै० ॥
मात्रे० ॥
महामहिषवाहिन्यै० ॥
प्राणेश्वर्यै० ॥
प्राणरूपायै० ॥
प्रधानपुरुषेश्वर्यै० ॥
सर्वशक्तिकलायै० ॥
काळ्यै० ॥
ज्योत्स्नायै० ॥

दिवे० ॥
महिषास्पदायै० ॥
सर्वकार्यनिहंत्र्यै० ॥
सर्वभूतेश्वरेश्वर्यै० ॥
अनादये० ॥
अव्यक्तगुहायै० ॥
महानंतायै० ॥
सनातन्यै० ॥
आकाशयोनये० ॥
योगस्थायै० ॥
महायोगेश्वरेश्वर्यै० ॥

महामायायै० ॥
सुदुष्पारायै० ॥
मूलप्रकृतये० ॥ ८० ॥
ईश्वर्यै० ॥
संसारयोनये० ॥
सकलायै० ॥
सर्वशक्तिसमुद्भवायै ॥
संसारपारायै० ॥
दुर्वारायै० ॥
दुर्निरीक्षायै० ॥
दुरासदायै० ॥

प्राणशक्तये० ॥
प्राणविद्यायै० ॥ ९० ॥
योगिनांपरमाकुलायै०॥
महाविभूतये० ॥
दुर्धर्षायै० ॥
मूलप्रकृतिसंभवायै० ॥
अनाद्यनंतविभवायै०॥
परार्थायै० ॥
पुरुषारण्यै० ॥
स्वर्गस्थित्यंतकारिण्यै०।
सुदुर्वाच्यायै० ॥

दुरत्ययायै० ॥ १०० ॥
शब्दयोनये० ॥
शब्दमय्यै० ॥
नादाख्यायै० ॥
नादविग्रहायै० ॥
प्रधानपुरुषातीतायै० ॥
प्रधानपुरुषात्मिकायै०।
पुराणायै० ॥
चिन्मय्यै० ॥
पुंसामादये०
पुरुषरूपिण्यै० ॥ १० ॥

भूतांतरस्थायै० ॥
कूटस्थायै० ॥
महापुरुषसंज्ञितायै० ॥
जन्ममृत्युजरातीतायै०
सर्वशक्तिसमुद्भवायै०।
व्यापिन्यै० ॥
अनवच्छिन्नायै० ॥
प्रधानानुप्रवेशिन्यै० ॥
क्षेत्रज्ञायै० ॥
शक्तये० ॥ २० ॥
अव्यक्तलक्षणायै० ॥

मलवर्जितायै० ॥
अनादिमायायै० ॥
असंभिन्नायै० ॥
त्रितत्वायै० ॥
प्रकृतये० ॥
गुणायै० ॥
महामायायै० ॥
समुत्पन्नायै० ॥
तामस्यै० ॥ ३० ॥
पौरुष्यै० ॥
ध्रुवायै० ॥

व्यक्ताव्यक्तात्मिकायै॥
कृष्णायै० ॥
रक्तायै० ॥
शुक्लायै० ॥
प्रसूतिकायै० ॥
अकार्यायै० ॥
कार्यजनन्यै० ॥
नित्यप्रसवधर्मिण्यै० ॥
सर्वप्रळयनिर्मुक्तायै० ॥
सृष्टिस्थित्यंतकारिण्यै०
ब्रह्मगर्भायै० ॥

चतुर्विंशायै० ॥
पद्मनाभायै० ॥
अच्युतात्मिकायै० ॥
वैद्युत्यै० ॥
भास्वत्यै० ॥
योनये० ॥
जगन्मात्रे० ॥ ५० ॥
ईश्वरप्रियायै० ॥
सर्वाधारायै० ॥
महारूपायै० ॥
सर्वैश्वर्यसमन्वितायै०॥

विश्वरूपायै० ॥
जगद्गर्भायै० ॥
विश्वेशेच्छानुवर्तिन्यै।
महीयस्यै० ॥
ब्रह्मयोनये० ॥
महालक्ष्मीसमुद्भवायै०।
महाविमानमध्यस्थायै।
महानिद्रायै० ॥
आत्महेतुकायै० ॥
सर्वसाधारिण्यै० ॥
सूक्ष्मायै० ॥

अविद्यायै० ॥
परमात्मिकायै० ॥
अनंतरूपायै० ॥
अनंतस्थायै० ॥
देव्यै० ॥ ७० ॥
पुरुषमोहिन्यै० ॥
अनेकाकारसंस्थानायै०।
कलात्रयविवर्जितायै०॥
ब्रह्मजन्मने० ॥
हरेर्मूर्तये० ॥ [-कायै०।
ब्रह्माविष्णुशिवात्मि-

ब्रह्मेशविष्णुजनन्यै० ॥
ब्रह्माख्यायै० ॥
ब्रह्मसंश्रयायै० ॥
व्यक्तप्रथमजायै० ॥
ब्राह्म्यै० ॥
महत्यै० ॥
ज्ञानरूपिण्यै० ॥
वैराग्यैश्वर्यधर्मात्मने०॥
ब्रह्ममूर्तये० ॥
हृदिस्थितायै० ॥
अपांयोनये० ॥

स्वयंभूतये० ॥
मानस्यै० ॥
तत्वसंभवायै० ॥ ९० ॥
ईश्वरायै० ॥
शर्वाण्यै० ॥
शंकरार्धशरीरिण्यै० ॥
भवान्यै० ॥
रुद्राण्यै० ॥
महालक्ष्म्यै० ॥
धरायै० ॥
अंबिकायै० ॥

महेश्वरसमुत्पन्नायै० ॥
भुक्तिमुक्तिफलप्रदायै० ।
सर्वेश्वर्यै० ॥
सर्ववंद्यायै० ॥
नित्यायै० ॥
मुदितमानसायै० ॥
ब्रह्मेंद्रोपेंद्रनमितायै० ॥
शंकरेच्छानुवर्तिन्यै० ॥
ईश्वरार्धासनगतायै० ॥
महेश्वरपतिव्रतायै० ॥
सकृद्विहारायै० ॥
संसारसमुद्रपरितोषिण्यै० ॥ २१० ॥
पार्वत्यै० ॥
हिमवत्पुत्र्यै० ॥
परमानंददायिन्यै० ॥
गुणाढ्यायै० ॥
योगदायै० ॥
योग्यायै० ॥
ज्ञानमूर्तये० ॥
विकासिन्यै० ॥
सावित्र्यै० ॥
कमलायै० ॥ २० ॥
लक्ष्म्यै० ॥
श्रियै० ॥
अनंतोरसिस्थितायै० ॥
सरोजनिलयायै० ॥
गंगायै० ॥
योगनिद्रायै० ॥
असुरार्दिन्यै० ॥
सरस्वत्यै० ॥
सर्वविद्यायै० ॥
जगज्ज्येष्ठायै० ॥ ३० ॥

सुमंगलायै० ॥
वाग्देव्यै० ॥
वरदायै० ॥
वाक्यायै० ॥
कीर्तये० ॥
सर्वार्थसाधकायै० ॥
वागीश्वर्यै० ॥
ब्रह्मविद्यायै० ॥
महाविद्यायै० ॥
सुशोभनायै० ॥ ४० ॥
गुह्यविद्यायै० ॥
आत्मविद्यायै० ॥
धर्मविद्यायै० ॥
आत्मभाविकायै० ॥
स्वाहायै० ॥
विश्वंभरायै० ॥
सिद्ध्यै० ॥
स्वधायै० ॥
मेधायै० ॥
श्रुतये० ॥ ५० ॥
धृतये० ॥
नीतये० ॥
सुनीतये० ॥
सुकृतये० ॥
माधव्यै० ॥
नरवाहिन्यै० ॥
पूज्यायै० ॥
विभाविन्यै० ॥
सौम्यायै० ॥
भोगिन्यै० ॥ ६० ॥
भोगदायिन्यै० ॥
शोभायै० ॥
वंशकर्यै० ॥

लोभायै० ॥
मालिन्यै० ॥
परमेष्ठिन्यै० ॥
त्रैलोक्यसुंदर्यै० ॥
रम्यायै० ॥
सुंदर्यै० ॥
कामचारिण्यै० ॥ ७० ॥
महानुभावायै० ॥
सत्वस्थायै० ॥
महामहिषमर्दिन्यै० ॥
सत्यभामायै० ॥

सुभद्रायै० ॥
रुक्मिण्यै० ॥
रुक्मवर्तिन्यै० ॥
पद्ममालायै० ॥
पापहरायै० ॥
विचित्रमुकुटायै० ॥ ८० ॥
रमायै० ॥
कांतायै० ॥
चित्रांबरधरायै० ॥
दिव्याभरणभूषितायै०
पीतांबरधरायै० ॥

मूर्तये० ॥
पीवरस्तनशोभनायै० ॥
मन्दारकबरीबन्ध्यै० ॥
कुंकुमागरुमर्दिन्यै० ॥
हंसाख्यायै० ॥ ९० ॥
व्योमनिलयायै० ॥
जगत्सृष्टिविवर्धितायै०
नियंत्र्यै० ॥
यंत्रवाहस्थायै० ॥
नंदिन्यै० ॥
भद्रकालिन्यै० ॥

आदित्यवर्णायै० ॥
कौमार्यै० ॥
मयूरवरवाहिन्यै० ॥
वृषासनगतायै० ॥ ३००
गौर्यै० ॥
महाकाळ्यै० ॥
सुरार्चितायै० ॥
अदितये० ॥
नियतायै० ॥
रौद्र्यै० ॥
पद्मगर्भायै० ॥

विवाहनायै० ॥
विरूपाक्षायै० ॥
लेलिहानायै० ॥ १० ॥
गुहापुरनिवासिन्यै० ॥
महाफलायै० ॥
अनवद्यांग्यै० ॥
कामरूपायै० ॥
विभावर्यै० ॥
विचित्ररत्नमुकुटायै० ॥
प्रणतार्तिप्रभंजिन्यै० ॥
कौशिक्यै० ॥

कर्मण्यै० ॥
रात्रये० ॥ २० ॥
त्रिदशार्तिप्रभंजिन्यै० ॥
बहुरूपायै० ॥
सुरूपायै० ॥
विरूपायै० ॥
रूपवर्जितायै० ॥
भक्तार्तिशमन्यै० ॥
भव्यायै० ॥
भवाभयविनाशिन्यै० ॥
निर्गुणायै० ॥

नित्यविभवायै० ॥३०॥
निःसारायै० ॥
निरुपद्रवायै० ॥
सर्वातिशायिन्यै० ॥
विश्वायै० ॥
सर्वसिद्धिप्रदायिन्यै० ॥
सर्वेश्वरप्रियायै० ॥
तार्क्ष्यायै० ॥
समुद्रांतरवासिन्यै० ॥
अकळंकायै० ॥
निराधारायै० ॥ ४० ॥

नित्यसिद्धायै० ॥
निरामयायै० ॥
कामधेनवे० ॥
महद्गर्भायै० ॥
धीमत्यै० ॥
मोहनाशिन्यै० ॥
निःसंकल्पायै० ॥
निरातंकायै० ॥
विनयावनतप्रियायै० ॥
ज्वालामालासहस्राढ्या-
यै० ॥ ५० ॥

देवदेव्यै० ॥
जगन्मय्यै० ॥
महाभगवत्यै० ॥
गर्भायै० ॥
वासुदेवसमुद्भवायै० ॥
महेंद्रोपेंद्रभगिन्यै० ॥
भक्तिगम्यायै० ॥
परावरायै० ॥
ज्ञानज्ञेयायै० ॥
जरातीतायै० ॥ ६० ॥
वेदांतविषयायै० ॥

गतये० ॥
दक्षिणायै० ॥
दहनायै० ॥
दह्यायै० ॥
सर्वभूतनमस्कृतायै० ॥
योगमायायै० ॥
विभागज्ञायै० ॥
महामोहायै० ॥
गरीयस्यै० ॥ ७० ॥
संध्यायै० ॥
सर्वसमुद्भूतये० ॥

ब्रह्मवृक्षाश्रयायै० ॥
अदितये० ॥
बीजांकुरसमुद्भूतये० ॥
महाशक्तये० ॥
महामतये० ॥
ख्यातये० ॥
प्रज्ञार्चितमतये० ॥
महाभोगींद्रशायिन्यै०।
विकृतये० ॥
शांकर्यै० ॥
शांतये० ॥

गणगंधर्वसेवितायै० ॥
वैश्वानर्यै० ॥
महाशालायै० ॥
देवसेनायै०
गुहप्रियायै० ॥
महारात्र्यै० ॥
शिवानंदायै० ॥ ९० ॥
शिख्यै० ॥
दुःस्वप्ननाशिन्यै० ॥
इज्यायै० ॥
पूज्यायै० ॥

जगद्धात्र्यै० ॥
दुर्विज्ञेयस्वरूपिण्यै० ॥
गुहांबिकायै० ॥
गुणोत्पत्त्यै० ॥
महापीठायै० ॥
मरुत्सुतायै० ॥ ४०० ॥
हव्यवाहांतरायै० ॥
भद्रायै० ॥
हव्यवाहसमुद्भवायै० ॥
जगद्योनये० ॥
जगन्मात्रे० ॥

जगन्मृत्यवे० ॥
जरातिगायै० ॥
बुद्धिमात्रे० ॥
बुद्धिमतये० ॥
पुरुषांतरवासिन्यै० । १०
तरस्विन्यै० ॥
समाधिस्थायै ॥
त्रिणेत्रायै० ॥
दिविसंस्थितायै० ॥
सर्वेंद्रियमनोमात्रे० ॥
सर्वभूतहृदिस्थितायै० ॥

संसारतारिण्यै० ॥
विद्यायै० ॥
ब्रह्मवाद्यै० ॥
मनोलयायै० ॥ २० ॥
ब्रह्माण्यै० ॥
बृहत्यै० ॥
ब्राम्ह्यै० ॥
ब्रह्मभूतायै० ॥
भवारण्यै० ॥
हिरण्मय्यै० ॥
महारात्र्यै० ॥

संसारपरिवर्तिकायै० ॥
सुमालिन्यै० ॥
सुरूपायै० ॥ ३० ॥
भोगिन्यै० ॥
हारिण्यै० ॥
प्रभायै० ॥
उन्मालिन्यै० ॥
सर्वसहायै० ॥
सर्वप्रत्ययसाक्षिण्यै० ॥
सुसौम्यायै० ॥
चंद्रवदनायै० ॥

तांडवासक्तमानसायै०
सर्वशुद्धिकर्यै० ॥ ४० ॥
शुद्धये० ॥
मलत्रयविनाशिन्यै० ॥
जगत्प्रियायै० ॥
जगन्मूर्तये० ॥
त्रिमूर्तये० ॥
अमृताश्रयायै० ॥
निराश्रयायै० ॥
निराहारायै० ॥
निरंकुशपदोद्भवायै० ॥

चक्रहस्तायै० ॥ ५० ॥
विचित्रांग्यै० ॥
स्रग्विण्यै० ॥
पद्मधारिण्यै० ॥
परावरविधानज्ञायै० ॥
महापुरुषपूर्वजायै० ॥
विद्येश्वरप्रियायै० ॥
विद्यायै० ॥
विद्युज्जिह्वायै० ॥
जिताश्रमायै० ॥
विद्यामय्यै० ॥ ६० ॥

सहस्राक्ष्यै० ॥
सहस्रवदनात्मजायै० ॥
सहस्ररश्मिमध्यस्थायै०
महेश्वरपदाश्रयायै० ॥
ज्वालिन्यै० ॥
सन्मय्यै० ॥
व्यापस्यै० ॥
तेजस्यै० ॥
पद्मबोधिकायै० ॥
महामायायै० ॥ ७० ॥
आश्रयायै० ॥

मान्यायै० ॥
महादेव्यै० ॥
मनोरमायै० ॥
व्योमलक्ष्म्यै० ॥
हंसरथायै० ॥
चेकितानायै० ॥
अमितप्रभायै० ॥
विश्वेश्वर्यै० ॥
विमानस्थायै० ॥ ८० ॥
विशोकायै० ॥
शोकनाशिन्यै० ॥

अनाहतायै० ॥
कुंडलिन्यै० ॥
नलिन्यै० ॥
पद्मवासिन्यै० ॥
सदानन्दायै० ॥
सदाकीर्तये० ॥
सर्वभूताश्रयस्थितायै०।
वाग्देवतायै० ॥ ९० ॥
ब्रह्मकलायै० ॥
कलातीतायै० ॥
कलारण्यै० ॥

व्योमशक्तये० ॥
क्रियाशक्तये० ॥
इच्छाशक्तये० ॥
परागतये० ॥
क्षोभिकायै० ॥
बुद्धिकायै० ॥
अभेद्यायै० ॥ ५०० ॥
भेदाभेदविवर्जितायै० ।
अभिन्नायै० ॥
भिन्नसंस्थानायै० ॥
वंशिन्यै० ॥

वंशहारिण्यै० ॥
गुह्यशक्तये० ॥
गुणातीतायै० ॥
सर्वदायै० ॥
सर्वतोमुख्यै० ॥
भगिन्यै० ॥ १० ॥
भगवत्पत्न्यै० ॥
सकलायै० ॥
कालहारिण्यै० ॥
सर्वजिते० ॥
सर्वतोभद्रायै० ॥

गुह्यायै० ॥
रूढायै० ॥
गुहारिण्यै० ॥
प्रजाश्रयायै० ॥
योगमात्रे० ॥ २० ॥
गंगायै० ॥
विश्वेश्वर्यै० ॥
कालिकायै० ॥
कपिलायै० ॥
कांतायै० ॥
कनकाभायै० ॥

कलांतरायै० ॥
पुण्यायै० ॥
पुष्करिण्यै० ॥
भोक्त्र्यै० ॥ ३० ॥
पुरन्दरपुरस्सरायै० ॥
पोषिण्यै० ॥
परमेश्वर्यायै० ॥
भूतिदायै० ॥
भूतिभूषणायै० ॥
पंचब्रह्मसमुत्पत्त्यै० ॥
परमार्थायै० ॥

अर्थविग्रहायै० ॥
धर्मोदयायै० ॥
भानुमत्यै० ॥ ४० ॥
योगिज्ञेयायै० ॥
मनोजवायै० ॥
मनोभवायै० ॥
महोरस्कायै० ॥
तापस्यै० ॥
वेदरूपिण्यै० ॥
वेदशक्त्यै० ॥
वेदमात्रे० ॥

वेदविद्यायै० ॥
प्रकाशिन्यै० ॥ ५० ॥
योगेश्वरेश्वर्यै० ॥
मालायै० ॥
महाशक्त्यै० ॥
मनोमय्यै० ॥
विश्वावस्थायै० ॥
वियन्मूर्त्यै० ॥
विद्युन्मालायै० ॥
विहायस्यै० ॥
किन्नर्यै० ॥

सुरभये० ॥ ६० ॥
वन्द्यायै० ॥
नन्दिन्यै० ॥
नन्दिवल्लभायै० ॥
भारत्यै० ॥
परमानन्दायै० ॥
परावरविभेदिकायै० ॥
सर्वप्रहरणोपेतायै० ॥
काम्यायै० ॥
कामेश्वरेश्वर्यै० ॥
अचिंत्यायै० ॥ ७० ॥

अनंतविभवायै० ॥
हृल्लेखायै० ॥
कनकप्रभायै० ॥
कूश्मांड्यै० ॥
नवरत्नाढ्यायै० ॥
सुगंधायै० ॥
गंधदायिन्यै० ॥
त्रिविक्रमपदोद्भूतायै० ।
धनुःपाणये० ॥
शिवोदयायै० ॥ ८० ॥
सुदुर्लभायै० ॥

धनाध्यक्षायै० ॥
धन्यायै० ॥
पिंगललोचनायै० ॥
शांतायै० ॥
प्रभावत्यै० ॥
दीप्तायै० ॥
पंकजायतलोचनायै० ॥
उर्वशीनृत्यसंपन्नायै० ॥
कर्णकुंडलभूषितायै० ॥
आद्यायै० ॥
हृत्कमलाबोधायै० ॥

गवांमात्रे० ॥
रणप्रियायै० ॥
सत्क्रियायै० ॥
गिरिजायै० ॥
शुद्धायै० ॥
मुनिपुष्पायै० ॥
निरंतरायै० ॥
दुर्गायै० ॥ ६०० ॥
कात्यायन्यै० ॥
चंड्यै० ॥
चर्चिकायै० ॥

शांतविग्रहायै० ॥
हिरण्यवर्णायै० ॥
जगत्यै० ॥
जगद्यन्तप्रवर्तिकायै० ॥
मन्दाराद्रिनिवासायै० ॥
शारदायै० ॥
स्वर्णमालिन्यै० ॥ १० ॥
रत्नमालायै० ॥
रत्नगर्भायै० ॥
वृष्ट्यै० ॥
विश्वप्रमाथिन्यै० ॥

पद्मानन्दायै० ॥
पद्मनिभायै० ॥
नित्यतुष्टायै० ॥
अमृतोद्भवायै० ॥
धन्वंतर्यै० ॥
दुष्प्रकंपायै० ॥ २० ॥
सूर्यमात्रे० ॥
वृषदत्यै० ॥
महेंद्रभगिन्यै० ॥
सौम्यायै० ॥
वरेण्यायै० ॥

वरदायकायै० ॥
कल्याण्यै० ॥
कमलायै० ॥
वामायै० ॥
पंचपुंसवरप्रदायै० ॥३०
वाच्यायै० ॥
परेश्वर्यै० ॥
वंद्यायै० ॥
दुर्जयायै० ॥
दुरतिक्रमायै० ॥
काळरात्रये० ॥

महावेगायै० ॥
वीरभद्रप्रियायै० ॥
हितायै० ॥
शंखिन्यै० ॥ ४० ॥
पद्मिन्यै० ॥
सांख्यायै० ॥
सांख्ययोगप्रवर्तिकायै०
चैत्रायै० ॥
संवत्सरायै० ॥
आरूढायै० ॥
जगत्संपूजितायै० ॥

अरुणायै० ॥
शुंभायै० ॥
खेचरायै० ॥ ५० ॥
अनंतायै० ॥
कंबुग्रीवायै० ॥
कविप्रियायै० ॥
खगध्वजायै० ॥
खगारूढायै० ॥
परार्थ्यायै० ॥
भगमालिन्यै० ॥
ऐश्वर्यपद्मनिलयायै० ॥

दुर्गा ॥२४॥

विरक्तायै० ॥
गरुडासनायै० ॥ ६० ॥
जयंत्यै० ॥
भृगुघ्ने० ॥
अगम्यायै० ॥
गह्वरेष्ठायै० ॥
गुहाग्रण्यै० ॥
संकल्पसिद्धायै० ॥
साम्यस्थायै० ॥
सर्वविज्ञानदायिन्यै० ॥
कलिकल्मषहंत्र्यै० ॥

गुह्योपनिषदे० ॥ ७० ॥
उत्तमायै० ॥
निष्ठादृष्टये० ॥
स्मृतये० ॥
व्याप्तये० ॥
तुष्टये० ॥
पुष्टये० ॥
क्रियावत्यै० ॥
वेत्र्यै० ॥
विश्वायै० ॥
अमरेशान्यै० ॥ ८० ॥

भुक्तिमुक्तिशिवामृता-
लोहितायै० ॥ [ग्यै० ॥
सर्पमालायै० ॥
भीषण्यै० ॥
वनमालिन्यै० ॥
अनंतशयन्यै० ॥
सैन्यायै० ॥
नरनारायणोद्भवायै० ॥
नृसिंह्यै० ॥
दैत्यमथिन्यै० ॥ ९० ॥
शंखचक्रगदाधरायै० ॥

सह ॥२४॥

सङ्कर्षणसमुत्पत्त्यै० ॥
अम्बिकायै० ॥
पदसंश्रयायै० ॥
महाज्वालायै० ॥
महामूर्तये० ॥
सन्मूर्तये० ॥
सर्वकामदुहे० ॥
सुस्नायवे० ॥
सुस्तन्यै० ॥ ७०० ॥
गौर्यै० ॥
13 धर्मकामार्थमोक्षदायै० ॥

भ्रूमध्यनिलयायै० ॥
पूर्वायै० ॥
पुराणपुरुषारण्यै० ॥
महाविभूतिदायै० ॥
मेध्यायै० ॥
सरोजनिलयासनायै० ।
अष्टादशभुजायै० ॥
अनाद्यायै० ॥ १० ॥
नीलोत्पलदळप्रभायै० ।
सर्वशक्त्यै० ॥
आसनारूढायै० ॥

धर्मायै० ॥
धर्मार्थवर्जितायै० ॥
वैराग्यज्ञाननिरतायै० ॥
निरालोकायै० ॥
निरिंद्रियायै० ॥
विचित्रगहनायै० ॥
आधारायै० ॥ २० ॥
शाश्वतस्थानवासिन्यै०
स्थानेश्वर्यै० ॥
निरानन्दायै० ॥
त्रिशूलवरधारिण्यै० ॥

दुर्गा अशेषदेवतायै० ॥
॥ २९ ॥ मूर्तये० ॥
देवतायै० ॥
परदेवतायै० ॥
गणांबिकायै० ॥
गिरेःपुत्र्यै० ॥ ३० ॥
निशुंभविनिपातिन्यै० ।
अवर्णायै० ॥
वर्णरहितायै० ॥
त्रिवर्णायै० ॥
जीवसंभवायै० ॥

अनन्तवर्णायै० ॥
अनाद्यन्तायै० ॥
शङ्कर्यै० ॥
शान्तमानसायै० ॥
अगोप्त्र्यै० ॥ ४० ॥
गोमत्यै० ॥
गोप्त्र्यै० ॥
गुह्यरूपायै० ॥
गुणान्तरायै० ॥
गोगर्यै० ॥
गव्यप्रियायै० ॥

गौर्यै० ॥ सह
गणेश्वरनमस्कृतायै० ॥
सत्यमात्रे० ॥
सत्यसन्धायै० ॥ ५० ॥
त्रिसंध्यायै० ॥
संधिवर्जितायै० ॥
सर्ववाचाश्रयायै० ॥
सांख्यायै० ॥
महाकालसमुद्भवायै० ॥
असंख्येयायै० ॥
अप्रमेयायै० ॥ ॥ २५ ॥

शून्यायै० ॥
शुद्धकुलोद्भवायै० ॥
बिंदुनादसमुत्पत्तये० ॥
शंभुवामायै० ॥
शशिप्रभायै० ॥
पिशंगायै० ॥
भेदरहितायै० ॥
मनोज्ञायै० ॥
मधुसूदिन्यै० ॥
महाश्रियै० ॥
श्रीसमुत्पत्तये० ॥

तमःपरेप्रतिष्ठितायै० ॥
त्रितत्वमात्रे० ॥ ७० ॥
त्रिविधायै० ॥
सुसूक्ष्मपदसंश्रयायै० ॥
शांत्यातीतायै० ॥
मलातीतायै० ॥
निर्विकारायै० ॥
शिवाश्रयायै० ॥
शिवाख्यायै० ॥
चित्रनिलयायै० ॥
शिवज्ञानस्वरूपिण्यै० ॥

दैत्यदानवनिर्मथ्यै० ॥
काश्यप्यै० ॥
कालकर्णिकायै० ॥
शास्त्रयोनये० ॥
क्रियामूर्तये ॥
चतुर्वर्गप्रदर्शिकायै० ॥
नारायण्यै० ॥
नरोत्पत्तये० ॥
कौमुद्यै० ॥
लिंगधारिण्यै० ॥
कामुक्यै० ॥ ९० ॥

ललिताभावायै० ॥
महामन्युसमुद्भवायै० ॥
परांतज्ञानमहिमायै० ॥
परावरविभूतिदायै० ॥
वीणाधर्यै० ॥
महानादायै० ॥
बांधवायै० ॥
वामलोचनायै० ॥
अमन्यवे० ॥
अमृतास्वादायै० ॥८००
पुरुहूतायै० ॥

पुरुष्टुतायै० ॥
अगोप्यायै० ॥
अभिन्नविषयायै० ॥
हिरण्यरजतप्रियायै० ॥
हिरण्यजनन्यै० ॥
हेमायै० ॥
हेमाभरणभूषितायै० ॥
विभ्राजमानायै० ॥
दुर्ज्ञेयायै० ॥ १० ॥
ज्योतिष्टोमफलप्रदायै०
महानिद्रासमुत्पत्तये०॥

अनिद्रायै० ॥
नित्यदेवतायै० ॥
दीर्घायै० ॥
ककुद्मिन्यै० ॥
शून्यायै० ॥
शांतिदायै० ॥
शांतिवर्धिन्यै० ॥
लक्ष्म्यादिशक्तिजनन्यै।
शक्तिचक्रप्रवर्तिकायै०।
त्रिशक्तिजनन्यै० ॥
जन्यायै० ॥ ॥ २६ ॥

षट्सूत्रपरिवर्तिकायै०॥
सुधात्रे० ॥
कर्मकर्त्र्यै० ॥
युगान्तदहनात्मिकायै०
सङ्कर्षण्यै० ॥
समृद्धात्र्यै० ॥
कामयोनये० ॥ ३० ॥
करीषिण्यै० ॥
ऐन्द्र्यै० ॥
त्रैलोक्यनमितायै० ॥
वैष्णव्यै० ॥

परमेश्वर्यै० ॥
प्रद्युम्नदयितायै० ॥
दान्तायै० ॥
युग्मदृष्ट्यै० ॥
त्रिलोचनायै० ॥
मदोत्कटायै० ॥ ४० ॥
हंसगतये० ॥
प्रचंडायै० ॥
चंडविक्रमायै० ॥
वृषभेशायै० ॥
वियन्मात्रे० ॥

विन्ध्यपर्वतवासिन्यै०।
हिमवन्मेरुनिलयायै०।
कैलासगिरिवासिन्यै०।
चाणूरहन्त्र्यै० ॥
तनयायै० ॥ ५० ॥
गीतिज्ञायै० ॥
कामरूपिण्यै० ॥
वेदविद्याव्रतास्नातायै०।
धर्मशीलायै० ॥
अनिलाशनायै० ॥
वीरभद्रप्रजायै० ॥

मंगलायै० ॥
माल्यायै० ॥
मालिन्यै० ॥
मलहारिण्यै० ॥
गन्धर्व्यै० ॥
करुणायै० ॥
ऐन्द्र्यै० ॥
कंबळाश्वतरप्रियायै० ॥
सौधामिन्यै० ॥
प्रजानन्दायै० ॥
भृकुटीकुटिलाननायै० ।

कर्णिकारप्रियायै० ॥
कक्ष्यायै० ॥
कंसप्राणापहारिण्यै० ॥
युगन्धरायै० ॥
युगावर्तायै० ॥
त्रिसन्ध्यायै० ॥
सन्धिवर्जितायै० ॥४०॥
प्रत्यक्षदेवतायै० ॥
आदित्यायै० ॥
दिव्यगन्धायै० ॥
दिवाकरायै० ॥

शक्रासनगतायै० ॥
शक्तये० ॥
स्वधाचारायै० ॥
शरासनायै० ॥
इष्टायै० ॥
विशिष्टायै० ॥ ५० ॥
शिष्टेष्टायै० ॥
शिष्टाशिष्टप्रपूजितायै
शतरूपायै० ॥
शतावर्तायै० ॥
विनतायै० ॥

॥ २८ ॥

सुरुचये० ॥
सुरायै० ॥
सुरेन्द्रमात्रे० ॥
सुद्युम्नायै० ॥
सुषुम्नायै० ॥ ६० ॥
सूर्यसंस्थितायै० ॥
समीक्षायै० ॥
सत्प्रतिष्ठायै० ॥
निवृत्तिज्ञानपारगायै०॥
धर्मशास्त्रार्थकुशलायै०
धर्मज्ञायै० ॥

धर्मवाहनायै० ॥
धर्माधर्मविधये० ॥
मन्त्र्यै० ॥
धार्मिकानांसदाप्रियायै।
धर्मशक्तये० ॥
धर्ममय्यै० ॥
विधर्मायै० ॥
विश्वधर्मिण्यै० ॥
धर्मांतरायै० ॥
धर्ममेघायै० ॥
धर्मपूर्वायै० ॥

धरापरायै० ॥
धर्मोपदेशायै० ॥
धर्मात्मने० ॥ ८० ॥
धर्मगम्यायै० ॥
धराधरायै० ॥
कपाल्यै० ॥
कालिकामूर्तये० ॥
कलाकलितविग्रहायै०॥
सर्वशक्तिविनिर्मुक्तायै।
सर्वशक्तये० ॥
आश्रयाश्रयायै० ॥

सर्वायै० ॥ प्रधानपुरुषायै० ॥ सदाशिवायै० ॥
सर्वैश्वर्यै० ॥ ९० ॥ ईशानायै० ॥ वियन्मूर्तये० ॥
सूक्ष्मायै० ॥ महादेव्यै० ॥ देवमूर्तये०। [॥१०००॥
सूक्ष्मज्ञानस्वरूपिण्यै० ॥ एकसाक्षिण्यै० ॥ ॐअमूर्तिगायै नमः—

॥ श्रीमहाकाळि महालक्ष्मि महासरस्वत्यै नमः सहस्रनाम पूजां समर्पयामि॥

॥ अथ अष्टोत्तर शतनाम पूजां करिष्ये ॥

ॐदुर्गायै नमः ॥
दारिद्र्यशमन्यै० ॥
दुर्गतिघ्नायै० ॥
दुरासदायै० ॥
लक्ष्म्यै० ॥
लज्जायै० ॥
महाविद्यायै० ॥
श्रद्धायै० ॥
पुष्ट्यै० ॥
स्वधायै० ॥ १० ॥
ध्रुवायै० ॥
महारात्र्यै० ॥

महामायायै० ॥
मायायै० ॥
मातं० ॥
सरस्वत्यै० ॥
शिवायै० ॥
शशिधरायै० ॥
शांतायै० ॥
शांभव्यै० ॥ २० ॥
भूतिदायिन्यै० ॥
तामस्यै० ॥
नियमायै० ॥
नार्यै० ॥
काळ्यै० ॥
नारायण्यै० ॥
कलायै० ॥
ब्राह्म्यै० ॥
वीणाधरायै० ॥
वाण्यै० ॥ ३० ॥
शारदायै० ॥
हंसवाहिन्यै० ॥
त्रिशूलिन्यै० ॥
त्रिणेत्रायै० ॥
त्रय्यै० ॥
त्रेतामय्यै० ॥
शुभायै० ॥
शंखिन्यै ॥
चक्रिण्यै० ॥
घोरायै० ॥ ४० ॥
कराळ्यै० ॥
मानिन्यै० ॥
मत्यै० ॥
महेश्वर्यै० ॥
महेश्वासायै० ॥

दुर्गा महिषघ्न्यै० ॥
॥ ३० ॥ मधुव्रतायै० ॥
मातंग्यै० ॥
मंगलायै० ॥
मुग्धायै० ॥ ५० ॥
मधुकैटभघातिन्यै० ॥
मयूरवाहिन्यै० ॥
नीलायै० ॥
भारत्यै० ॥
भास्वरांबरायै० ॥
पीतांबरधरायै० ॥

पीतायै० ॥
कौमार्यै० ॥
पीवरस्तन्यै० ॥
रजन्यै० ॥ ६० ॥
रागिण्यै० ॥
रक्तायै० ॥
गदिन्यै० ॥
घंटिन्यै० ॥
प्रभायै० ॥
शुंभघ्न्यै० ॥
सुभगायै० ॥

सुभ्रुवे० ॥ अष्ट
निशुंभप्राणहारिण्यै० ॥
कामाक्ष्यै० ॥ ७० ॥
कामुक्यै० ॥
कन्यायै० ॥
रक्तबीजनिपातिन्यै० ॥
सहस्रवदनायै० ॥
साध्यायै० ॥
साक्षिण्यै० ॥
शाङ्कर्यै० ॥
द्युतये० ॥ ॥ ३० ॥

भार्गव्यै० ॥
वारुण्यै० ॥ ८० ॥
विद्यायै० ॥
विद्याधरसुरार्चितायै०।
गायत्र्यै० ॥
गिरिजायै० ॥
गंगायै० ॥
गार्ग्यै० ॥
गीतायै० ॥
घनस्वनायै० ॥

छंदोमय्यै० ॥
महाछायायै० ॥ ९० ॥
चार्वंग्यै० ॥
चन्दनप्रियायै० ॥
जनन्यै० ॥
जाह्नव्यै० ॥
जात्यै० ॥
शाङ्कर्यै० ॥
हतराक्षस्यै० ॥
वल्लक्यै० ॥

वल्लभायै० ॥
वल्यायै० ॥ १०० ॥
वल्यलंकृतमध्यमायै०॥
हरीतक्यै० ॥
हयारूढायै० ॥
भूतये० ॥
हरिहरप्रियायै० ॥
वज्रहस्तायै० ॥
वरारोहायै०॥ [॥ १०८
ॐ सर्वसिद्धिवरप्रदायै–

॥ श्रीमहाकालि महालक्ष्मि महासरस्वत्यै नमः ॥ अष्टोत्तरशतनाम पूजां समर्पयामि ॥

अथोत्तरपूजां करिष्ये ॥ घृतगुग्गुळसंयुक्तं गन्धादिसुमनोहरम् । धूपं गृहाण चामुंडे भद्रकालि नमोऽस्तु ते ॥ भद्रकाल्यै नमः ॥ धूपं समर्पयामि ॥ पट्टसूत्रोल्लसद्वर्तिगोघृतेन समन्वितम् । दीपं ज्ञानप्रदं नित्यं प्रीत्यर्थं प्रति गृह्यताम् ॥ ज्ञानरूपायै० ॥ दीपं० ॥ दिव्यान्नं गोघृतोपेतं भक्ष्यभोज्यसमन्वितम् । गृहाणसद्दशोपेतमुपहारं सुरेश्वरि ॥ सुरेश्वर्यै० ॥ नैवेद्यं० ॥ पूगीफलमिति तांबूलम्० ॥ दुर्गा कात्यायनी चंडी महिषासुरमर्दिनि । दीपमालां गृहीत्वा तां सुप्रीतवरदास्तु मे ॥ वरदायै० ॥ मंगळनीराजनम्० ॥ कुंकुमौघसमायुक्तं श्रीचंदनविलेपितं । बिल्वपत्रकृतावासे गृहाणार्घ्यं नमोऽस्तु ते ॥ बिल्वाश्रयायै० ॥ प्रसन्नार्घ्यं० ॥ नारायणि नमस्तेऽस्तु नानापुष्पसमन्वितम् । नानामंत्रान्समुच्चार्य सर्वेश्वरि नमोऽस्तु ते ॥ सर्वेश्वर्यै० ॥ मंत्रपुष्पम्० ॥ प्रदक्षिणं करिष्यामि देवि मंगलदे शुभे । मम जन्मार्जितं पापं

निवारय नमोऽस्तु ते ॥ शुभायै० ॥ प्रदक्षिणम्० ॥ नमस्ते देवदेवेशि नमस्ते विश्वभाविनि । नमस्तेऽस्तु जगन्मातस्त्राहि मां भवसागरात् ॥ जगन्मात्रे नमः ॥ नमस्कारं समर्पयामि ॥ अथार्घ्यं ॥ महादुर्गि महावाणि भारती वाक्सरस्वति । इदमर्घ्यं प्रदास्यामि महादुर्गे नमोऽस्तु ते ॥ महादुर्गायै नमः इदमर्घ्यं ॥ १ ॥ आर्ये ब्राह्मि महाधेनु वेदगर्भे अधीश्वरि । गृहाणार्घ्यं मया दत्तं महालक्ष्मि नमोऽस्तु ते ॥ महालक्ष्म्यै० ॥ इदमर्घ्यं० ॥ २ ॥ श्रीपद्मे कमले लक्ष्मि वीणाश्रुतिसमन्विते । गृहाणार्घ्यं मया दत्तं भगवत्यै नमोऽस्तु ते ॥ भगवत्यै० ॥ इदमर्घ्यं ॥ ३ ॥ सरस्वति महारौद्रे महादेवि वरानने । गृहाणार्घ्यं मया दत्तं कुमारि सततं प्रिये ॥ कुमार्यै० ॥ इदमर्घ्यं ॥ ४ उमे गौरीश्वरी चंडी सैन्दरी सुभगे सति । अम्बिके त्र्यंबिके देवि गृहाणार्घ्यं शिवप्रिये ॥ शिवप्रियायै० ॥ इदमर्घ्यं ॥ ५ ॥ महिषघ्नि विरूपाक्षि

महासम्पत्प्रदायिनि । गृहाणार्घ्यं मया दत्तं भद्रकालि नमोऽस्तु ते ॥ भद्रकाल्यै० ॥ इदमर्घ्यं ॥ ६ ॥ भीमा च रक्तदन्ती च चामुंडी चंडिके शिवे । गृहाणार्घ्यं मया दत्तं चंडिकायै नमोऽस्तु ते ॥ चंडिकायै० ॥ इदमर्घ्यं ॥७॥ वाणी सरस्वती वेणि वीणापुस्तकधारिणि । गृहाणार्घ्यं मया दत्तं सरस्वत्यै नमोऽस्तु ते ॥ सरस्वत्यै० ॥ इदमर्घ्यं ॥ ८ ॥ वागीश्वरि नमस्तेऽस्तु नमस्ते भक्तवत्सले । अशेषरूपसंयुक्ते दत्तमर्घ्यं गृहाण ते ॥ अशेषरूपसंयुक्तायै नमः इदमर्घ्यं ॥ ९ ॥ अथ मूलेन द्रोणपूजां कुर्यात् ॥ प्रार्थनं करिष्ये ॥ जय देवि विरूपाक्षि जयातीते निरंजने । जय कोट्यर्कसङ्काशे जय चन्द्रनिभानने ॥ १ ॥ जय सिद्धमुनींद्रादिवन्दितांघ्रिसरोरुहे । जय रुद्रप्रिये भीमे जय दुष्टनिबर्हणे ॥ २ ॥ जय विष्णुप्रिये देवि जय लोकविभूतिदे । जय रत्नप्रदीप्तांगि जय हेमविभूषणे ॥ ३ ॥ जय सिद्धेश्वरे देवि ज्ञानगम्ये

जितेंद्रिये । जय भालेन्दुतिलके त्र्यंबके जय वृद्धिदे ॥ ४ ॥ सर्वलक्ष्मीप्रदे देवि सर्वरक्षाप्रदायिनि । धर्मार्थकाममोक्षाणां चतुर्वर्गफलप्रदे ॥ ५ ॥ शैलपुत्रि नमस्तेऽस्तु ब्रह्मचारि नमोऽस्तु ते । चंडघंटे नमस्तेऽस्तु कूश्मांड्यै ते नमो नमः ॥ ६ ॥ स्कन्दमातर्नमस्तेऽस्तु कात्यायनि नमोऽस्तु ते । काळरात्रि नमस्तेऽस्तु महागौरि नमोऽस्तु ते ॥ ७ ॥ महादुर्गे नमस्तेऽस्तु महालक्ष्मि नमोऽस्तु ते । मधुकैटभनाशिन्यै नमो महिषमर्दिनि ॥ ८ ॥ धूम्रलोचननिर्नाशे चंडमुंडविनाशिनि । रक्तबीजवधे देवि निशुंभप्राणहारिणि ॥ ९ ॥ नमः शुंभासुरारिण्यै त्रैलोक्यवरदा भव । देवि देहि परं ज्ञानं देवि देहि परं सुखम् ॥ १० ॥ धर्मं देहि धनं देहि कामं मोक्षं च देहि मे । पुत्रान् पशूंश्च कोशांश्च सद्म क्षेत्र धनानि च ॥ ११ ॥ देहि देहि परं ज्ञानं देहि देहि परं सुखम् । यद्यदिच्छाम्यहं देवि तत्तत्सर्वं

प्रयच्छ मे ॥ १२ ॥ रूपं कीर्तिं बलं वीर्यं धनं धान्यं जय सुखम् । आयुरारोग्यमैश्वय देहि मे कमलासने ॥ १३ ॥ सर्वमङ्गलमांगल्ये शिवे सर्वार्थसाधके । शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥ १४ ॥

इति प्रार्थनं समर्पयामि ॥ ध्यायामीत्यादि पुनः पूजां कृत्वा यस्यस्मृत्येति पूजासमर्पणं कुर्यात् ॥ दुर्गा दात्री दुर्गा भोक्त्री दुर्गा सर्वमिदं जगत् । दुर्गा यजति भूतात्मा या दुर्गा सोऽहमेवतु ॥ श्रीः ॥ श्रीः ॥

एवं यः कुरुते भक्त्या वत्सरे वत्सरे नृप । आश्वयुक् शुक्लपक्षे तु प्रतिपत्प्रभृतिक्रमात् ॥ १ ॥ महानवमि पर्यंतं पूजां वित्तानुसारतः । सुवासिनीनां विप्राणां कुमारीणां च भोजयेत् ॥ २ ॥ तस्य विघ्नानि सर्वाणि नश्यन्ति कृपया सदा । देव्यास्ततो भवेच्छ्रीमांल्लभते पुत्रसंपदं ॥ ॥ ३ ॥ ऐश्वर्यं राजवश्यं च जनवश्यं च विंदति । सर्वसिद्धिमवाप्नोति ॥ ३३ ॥

सर्वान्कामानवाप्नुयात् ॥ ४ ॥ इति कल्पोक्त दुर्गासहस्रनाम पूजाविधिः ॥

श्रीमुकाम्बार्पणमस्तु ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

स्वस्ति ॥ श्रीगणेशाय नमः ॥ अथ कल्पोक्तशारदाष्टोत्तरशतनाम पूजाविधिः ॥ आचम्य, प्राणानायम्य, देशकालौ सङ्कीर्त्य, एवं गुणेत्यादि चतुर्विधफलपुरुषार्थफलसिध्यर्थं, वागादि विद्याविशारदत्वं, मूकादिजड निवृत्यर्थं, वाक्सिध्यथ, जिह्वाबन्धननिवृत्यर्थं, समस्तविद्याप्राप्त्यर्थं, श्री शारदापरमेश्वरीप्रीत्यर्थं, कल्पोक्तपूजापूर्वक अष्टोत्तरशतनामपूजां करिष्ये इति सङ्कल्प्य, गणपतिं प्रार्थ्य, कलशार्चनादिकृत्वा, द्वारपालपूजांकुर्यात् ॥

 पूर्वद्वारे द्वारश्रियै नमः ॥ लक्ष्म्यै० ॥ मायायै० ॥ दक्षिणद्वारे द्वारश्रियै० ॥
 गौर्यै० ॥ रथ्यै० ॥ पश्चिमद्वारे द्वारश्रियै० ॥ जयायै० ॥ विभूत्यै० ॥
उत्तरद्वारे द्वारश्रियै० ॥ शङ्खनिधये० ॥ पद्मनिधये नमः ॥ इति द्वारपाल
देवताभ्यो नमः ॥ ध्यानाद्युपचारान् समर्पयामि ॥ अथ पीठपूजां करिष्ये ॥
आधारशक्त्यै नमः ॥ अनन्ताय० ॥ केशवाय० ॥ नाळाय० ॥ पद्माय० ॥
दळेभ्यो० ॥ केसरेभ्यो० ॥ कर्णिकेभ्यो० ॥ बीजेभ्यो० ॥ इति पीठदेवता-
भ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ अथ नवशक्तिपूजां करिष्ये ॥ मेधायै
नमः ॥ प्रज्ञायै० ॥ धिषणायै० ॥ धीरायै० ॥ धृत्यै० ॥ स्मृत्यै० ॥ बुध्यै० ॥
विद्येश्वर्यै० ॥ भद्रकाळ्यै नमः ॥ इति नवशक्तिदेवताभ्यो नमः ॥ ध्याना
द्युपचारान्० ॥ ॐनमो भगवत्यै—भूषितश्रीशारदापरमेश्वरि अत्रागच्छा-
वाहयिष्ये ॥ आवाहयामि ॥ आवाहिता भवेत्यादि षण्मुद्राः प्रदर्श्य ॥

ब्रह्मपत्न्यै च विद्महे महासेन्यै च धीमहि । तन्नः सरस्वती प्रचोदयात् ॥
इदमर्घ्यं ॥ शब्दब्रह्मऋषिः ॥ गायत्री छंन्दः ॥ शारदापरमेश्वरी देवता ॥
अंकंखंगंघंङं, आं अंगु० ॥ इंचंछंजंझंञं, ईं तर्जनी० ॥ उंटंठंडंढंणं, ऊं
मध्यमा० ॥ एंतंथंदंधंनं, ऐं अनामिका० ॥ ओंपंफंबंभंमं, औं कनिष्ठिका०॥
अंयंरंलंवंशंषंसंहंळंक्षं, अः करतळ० ॥ एवं हृदयादिन्यासः ॥ भूर्भुवः
सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥ सिद्धां स्वच्छविलेपमाल्यकुसुमां
शीतांशुखंडोज्ज्वलां मुद्रामक्षगुणां सुधाढ्यकलशां विद्यां च हस्तांबुजैः ॥
बिभ्राणां कमलासनां कुचनतां वाग्देवतां सुस्मितां वन्दे वाग्विभवप्रदां
सुखकरीं सौभाग्यसम्पत्करीम् ॥ इति ध्यानम् ॥ अंकंखंगंघंङं इंचंछंजंझंञं
उंटंठंडंढंणं एंतंथंदंधंनं ओंपंफंबंभंमं अंयंरंलंवंशंषंसंहंळंक्षं ॥ इति जपम् ॥
 लं पृथिव्यात्मिकायै नम इति पंचोपचारान् कृत्वा आवरणपूजां कुर्यात् ॥

प्रथमावरणं ॥ अंकंखंगंघंङं, आं हृदयाय नमः ॥ इंचंछंजंझंञं, ईं शिरसे नमः ॥ उंटंठंडंढंणं, ऊं शिखायै नमः ॥ एंतंथंदंधंनं, ऐं कवचाय नमः ॥ ओंपंफंबंभंमं, औं नेत्रत्रयाय नमः ॥ अंयंरंलंवंशंषंसंहंळंक्षं, अः अस्त्राय नमः ॥ इति प्रथमावरणदेवताभ्यो नमः ॥ ध्यानाद्युपचारान्० ॥ अथ द्वितीयावरणम् ॥ अं नमः ॥ आं नमः ॥ इं नमः ॥ ईं नमः ॥ उं नमः ॥ ऊं नमः ॥ ऋं नमः ॥ ॠं नमः ॥ ऌं नमः ॥ ॡं नमः ॥ एं नमः ॥ ऐं नमः ॥ ओं नमः ॥ औं नमः ॥ अं नमः ॥ अः नमः ॥ इति द्वितीयावरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथ तृतीयावरणम् ॥ कं खं गं घं ङं नमः ॥ चं छं जं झं ञं नमः ॥ टं ठं डं ढं णं नमः ॥ तं थं दं धं नं नमः ॥ पं फं बं भं मं नमः ॥ यं रं लं वं शं षं सं हं ळं क्षं नमः ॥ इति तृतीयावरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथ चतुर्थावरणम् ॥ अणिम्ने नमः ॥ महिम्ने० ॥ गरिम्णे० ॥

लघिम्ने० ॥ प्राप्तये० ॥ प्राकाम्याय० ॥ ईशित्वाय० ॥ वशित्वाय० ॥ इति चतुर्थावरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथ पंचमावरणम् ॥ ब्राह्म्यै० माहेश्वर्यै० ॥ कौमार्यै० ॥ वैष्णव्यै० ॥ वाराह्यै० ॥ इन्द्राण्यै० ॥ चामुंडायै० महालक्ष्म्यै० ॥ इति पंचमावरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथ षष्ठावरणम्० ॥ गंगायै नमः ॥ यमुनायै० ॥ सरस्वत्यै० ॥ गोदावर्यै० ॥ नर्मदायै० ॥ सिंधवे० ॥ कावेर्यै० ॥ इति षष्ठावरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथ सप्तमावरणम् ॥ इन्द्राय सुराधिपतये नमः ॥ अग्नये तेजोधिपतये० ॥ यमाय प्रेताधिपतये० ॥ निर्ऋतये रक्षोधिपतये० ॥ वरुणाय जलाधिपतये० ॥ वायवे प्राणाधिपतये० ॥ सोमाय नक्षत्राधिपतये० ईशानाय विद्याधिपतये० ॥ अनन्ताय नागाधिपतये० ॥ ब्रह्मणे लोकाधिपतये० ॥ इति सप्तमावरणदेवताभ्यो नमः ॥ ध्यानाद्युप० ॥ अथाष्टमा-

वरणम् ॥ वज्राय नमः ॥ शक्तये० ॥ दंडाय० ॥ खड्गाय० ॥ पाशाय० ॥
अंकुशाय० ॥ गदायै० ॥ शूलाय० ॥ चक्राय० ॥ पद्माय० ॥ इत्यष्टमावरण
देवताभ्यो नमः ॥ ध्यानाद्युपचारान् समर्पयामि ॥ इत्यावरणपूजां समर्प
यामि ॥ अथ द्वादशनामपूजां करिष्ये ॥ शारदायै नमः ॥ वागीश्वर्यै० ॥
वाक्सिध्यै० ॥ वरदायै० ॥ वाण्यै० ॥ सिध्यै० ॥ ब्रह्माण्यै० ॥ लेख्यायै०
पार्वत्यै० ॥ लक्ष्म्यै० ॥ सरस्वत्यै० ॥ श्रियै नमः ॥ इति द्वादशनामपूजां
समर्पयामि ॥ अथ षोडशोपचारपूजां करिष्ये ॥ सुभाषितां स्वधाकान्तां
भारतीं प्रणमाम्यहं । शब्दब्रह्ममयीं ध्यायेद्ध्यानकामसमाहितः ॥ शब्द
ब्रह्ममय्यै नमः ॥ ध्यानं समर्पयामि ॥ १ ॥ देवि त्रैलोक्यजननि सर्वलो-
कैकपावनि । आगच्छ भगवत्यत्र सरस्वति नमोऽस्तु ते ॥ सरस्वत्यै० ॥
आवाहनं ॥ २ ॥ सर्वदेवमयाकारे सर्वलोकैकसाक्षिणि । आसनं ते मया

दत्तं शारदायै नमोऽस्तु ते ॥ शारदायै० ॥ आसनम् ॥ ३ ॥ पवित्ररूपे
परमे परमाश्रितवल्लभे । भारति स्तूयमाने त्वं पाद्यं गृहीष्व कल्पितम् ॥
भारत्यै० ॥ पाद्यं ॥ ४ ॥ समस्तजगदाधारे सर्वप्राणिमनोरमे । इदमर्घ्यं
गृहाण त्वं देवि ब्रह्मर्षिसेविते ॥ देव्यै० ॥ अर्घ्यं० ॥ ५ ॥ सर्वलोकैक-
विद्यार्थं सदा सर्वाधिकारिणि । गृहाणाचमनं प्रीत्या सर्वविद्ये नमोऽस्तु
ते ॥ सर्वविद्यायै० ॥ आचमनम्० ॥ ६ ॥ आपक्षीरघृतं चैव दधिसर्पि-
समन्वितं । मधुपर्कं मया देवि तुभ्यं स्वीकुरु चंडिके ॥ चंडिकायै० ॥
मधुपर्कं० ॥ ७ ॥ क्षीरं दधिघृतं चैव मधुशर्करया युतं । पंचामृतं गृहा-
णेशे भाषायै ते नमोऽस्तु ते ॥ भाषायै० ॥ पंचामृतस्नानं० ॥ ८ ॥
जाह्नवी जलमत्यंतपवित्रीकरणं परं । स्नानार्थं ते प्रदास्यामि भो वाणि
प्रतिगृह्यतां ॥ वाण्यै० ॥ शुद्धोदकस्नानं० ॥ ९ ॥ केतकीमल्लिकादिभ्यो

पुष्पेभ्यश्च तथैव च । सुवासितजलस्नानं चिन्मय्यै ते नमोऽस्तु ते ॥
चिन्मय्यै० ॥ सुवासितजलस्नानं ॥ १० ॥ विश्वरूपे नमस्तेऽस्तु नमस्ते ज्ञानमुद्रिके । पुनराचमनं भद्रे प्रीत्यर्थं प्रतिगृह्यतां ॥ भद्रायै० ॥ पुनराचमनं० ॥ ११ ॥ पयःफेननिभे शुभ्रे पद्मपत्रायतेक्षणे । गृह्यतां परिधानार्थमिमे वस्त्रे नवैर्युते ॥ पद्मपत्रायतेक्षणायै० ॥ वस्त्रयुग्मं० ॥ १२ ॥ शोभितं नवरत्नानि स्वर्णवर्णाद्यलंकृतं । अलङ्कारं गृहाणेदं महामाये नमोऽस्तु ते ॥ महामायायै० ॥ आभरणं ॥ १३ ॥ देवदानवगंधर्वयक्षराक्षसगुह्यकैः । अर्चितव्ये सदा देवि गंधोऽयं प्रतिगृह्यतां ॥ देवार्चितायै० गंधं ॥ १४ ॥ सरस्वति शुभे देवि अक्षतानतिनिर्मलान् । ददामि तुभ्यं देवेशि प्रीत्यर्थं प्रतिगृह्यतां ॥ देवेश्यै० ॥ अक्षतान्० ॥ १५ ॥ आराधिते सदा देवैर्ब्रह्मरुद्रपुरोगमैः । गृह्यतां सर्वपुष्पाणि कमलासनवल्लभे ॥

कमलासनवल्लभायै० ॥ पुष्पाणि समर्पयामि ॥ १६ ॥ इति षोडशोपचार पूजां समर्पयामि ॥ अथांगपूजां करिष्ये ॥ सरस्वत्यै नमः ॥ पादौ पूजयामि॥ कमलायै० ॥ जानुनी० ॥ विश्वाननायै० ॥ कटिं० ॥ शारदायै० ॥ उदरं० ॥ जगन्मयायै० ॥ हृदयं० ॥ वत्सलायै० ॥ स्तनद्वयं० ॥ चतुर्भुजायै० ॥ भुजान्० ॥ वरेण्यायै० ॥ हस्तान्० ॥ कम्बुकंठायै० ॥ कंठं० ॥ चंद्रमुख्यै०॥ मुखं० ॥ ध्यानाद्यन्तायै० ॥ शिरः० ॥ सर्वेश्वर्यै नमः ॥ सर्वांगं पूजयामि ॥ इत्यंगपूजां समर्पयामि ॥ अथ पत्रपूजां करिष्ये ॥ विभावर्यै नमः ॥ भृंगराजपत्रं समर्पयामि ॥ कमलवासिन्यै० ॥ मदनकस्तूरिपत्रं० ॥ कामाक्ष्यै० मरुगपत्रं० ॥ शर्वाण्यै० ॥ बृहतीपत्रं० ॥ श्रियै० ॥ विष्णुक्रान्तिपत्रं० ॥ शारदायै० ॥ बिल्वपत्रं० ॥ श्रीशारदापरमेश्वर्यै नमः ॥ सर्वपत्राणि समर्पयामि ॥ इति पत्रपूजां समर्पयामि ॥ अथ पुष्पपूजां करिष्ये ॥ देव्यै

नमः ॥ सेमन्तिकापुष्पं समर्पयामि ॥ शङ्करायै० ॥ मल्लिकापुष्पं० ॥ शारदायै० ॥ करवीरपुष्पं० ॥ ब्राह्म्यै० ॥ अपामार्गपुष्पं० ॥ कमलवासिन्यै०॥ कुशपुष्पं० ॥ सरस्वत्यै० ॥ पारिजातपुष्पं० ॥ विष्णुप्रियायै० ॥ केतकीपुष्पं० ॥ शारदायै० ॥ पद्मपुष्पं० ॥ श्रीशारदापरमेश्वर्यै नमः ॥ सर्वपुष्पाणि समर्पयामि ॥ इति पुष्पपूजां समर्पयामि ॥ श्रीः ॥ ॐ अस्य श्रीशारदा अष्टोत्तरशतनामस्तोत्रमन्त्रस्य ॥ ब्रह्मा ऋषिः ॥ गायत्रीच्छन्दः ॥ श्रीशारदापरमेश्वरी देवता ॥ यद्वागिति बीजम् ॥ देवीं वाचमिति शक्तिः॥ प्रणोदेवीति कीलकम् ॥ श्रीशारदापरमेश्वरीप्रीत्यर्थे जपे विनियोगः ॥ पूर्ववत् षडंगन्यासः ॥ ध्यानम् ॥ या कुन्देन्दुतुषारहारधवळा या शुभ्रवस्त्रावृता या वीणावरदंडमंडितकरा या श्वेतपद्मासना ॥ या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैस्सदा वन्दिता सा मां पातु सरस्वती भगवती निःशेष-

जाड्यापहा ॥ इति ध्यानम् ॥ मम इष्टकाम्यार्थसिध्यर्थं श्रीशारदा परमेश्वरीप्रीत्यर्थं अष्टोत्तरशतनामपूजां करिष्ये ॥

ॐसरस्वत्यै नमः ॥	शिवानुज्ञायै० ॥ १० ॥	महापारायै० ॥
महामायायै० ॥	ज्ञानमुद्रायै० ॥	महाकुशायै० ॥ २० ॥
श्रीप्रदायै० ॥	रामायै० ॥	विनतायै० ॥
वरप्रदायै० ॥	पुस्तकधारिण्यै० ॥	विदितायै० ॥
भद्रायै० ॥	कामरूपायै० ॥	विश्वायै० ॥
पद्मनिधये० ॥	महालक्ष्म्यै० ॥	विद्युन्मालायै० ॥
पद्मायै० ॥	महापातकनाशिन्यै० ॥	विलासिन्यै० ॥
मालिन्यै० ॥	विद्यांगायै० ॥	चंडिकायै० ॥
पद्मपत्रिकायै० ॥	महाकाळ्यै० ॥	चन्द्रवदनायै० ॥

चन्द्रलेखविभूषितायै०
सावित्र्यै० ॥
सुवासायै० ॥ ३० ॥
विद्यालंकारभूषितायै०
वाग्देव्यै० ॥
वसुधायै० ॥
तीव्रायै० ॥
महाभोगायै० ॥
महाबलायै० ॥
विद्यायै० ॥
गोपवत्यै० ॥

जटिलायै० ॥
विंध्यवासिन्यै० ॥४०॥
गदिन्यै० ॥
खेटिन्यै० ॥
प्रीतायै० ॥
भोगदायै० ॥
सत्यवादिन्यै० ॥
सौधामिन्यै० ॥
सुधामूर्तये० ॥
सुभद्रायै० ॥
सुरवन्दितायै० ॥

निद्रायै० ॥ ५० ॥
सत्यायै० ॥
यमुनायै० ॥
महाविश्वायै० ॥
सुरात्मिकायै० ॥
त्रिकालज्ञायै० ॥
ब्रह्ममय्यै० ॥
त्रिमूर्तये० ॥
नीललोचनायै० ॥
महाशान्तये० ॥
महाविद्याधारिण्यै० ॥

त्रिगुणात्मिकायै० ॥
वस्त्ररूपायै० ॥
महारूपायै० ॥
शुंभप्राणापहारिण्यै० ।
पद्मासनायै० ॥
पद्महस्तायै० ॥
निशुंभप्राणहारिण्यै० ।
रक्तबीजनिहन्त्र्यै० ॥
धूम्रलोचनदर्पघ्न्यै० ॥
अक्षरायै० ॥ ७० ॥
कौमार्यै० ॥

चंडप्राणापहारिण्यै० ॥
सुप्रभायै० ॥
काळरात्र्यै० ॥
मुंडकायै० ॥
प्रभेदिन्यै० ॥
ज्ञानदायै० ॥
स्तुतायै० ॥
षडङ्गपदविक्रमायै० ॥
पञ्चाशद्वर्णरूपायै० ॥
सुधाकलशधारिण्यै० ।
ब्राह्म्यै० ॥

माहेश्वर्यै० ॥
कौमार्यै० ॥
वैष्णव्यै० ॥
वाराह्यै० ॥
इन्द्राण्यै० ॥
चामुंडायै० ॥
शांभव्यै० ॥
चित्रमालाधरायै०॥९०
कांतायै० ॥
चित्रगन्धानुलेपनायै०॥
अक्षमालाधरायै० ॥

नित्यायै० ॥	सूक्ष्मबुध्यायै० ॥	तुष्टिरूपायै० ॥
जपसौभाग्यदायिन्यै०।	रक्तपादायै० ॥ १०० ॥	निद्रारूपायै० ॥
श्वेताननायै० ॥	उन्मदायै० ॥	पुष्टिदायै० ॥ [॥१०८॥
नीलतुंडायै० ॥	निधनंजयायै० ॥	चतुराननजायै० ॥
पीवरस्तनमंडितायै० ॥	बुद्धिरूपायै० ॥	ॐचतुर्वर्गफलप्रदायै०–

श्रीशारदापरमेश्वर्यै नमः ॥ अष्टोत्तरशतनामपूजां समर्पयामि ॥ श्रीः ॥ अथोत्तरपूजां करिष्ये ॥ विश्वासने नमस्तुभ्यं नित्यं कल्याणकारिणि ॥ गृह्यतां देवि धूपोऽयं सर्वेषामघनाशिनि ॥ अघनाशिन्यै नमः ॥ धूपं समर्पयामि ॥ अज्ञानध्वान्तविध्वंसि कर्मदक्षे सरस्वति ॥ सुस्नेहवर्ति-संयुक्तं दीपोऽयमवलोक्यतां ॥ सरस्वत्यै० ॥ दीपं ॥ नानारससमायुक्तं नानाफलसमन्वितं ॥ अपूपयुतपक्वान्नं नैवेद्यं प्रतिगृह्यतां ॥ शारदायै० ॥

नैवेद्यं० ॥ गृहाण देवि ताम्बूलं कर्पूरेण समन्वितं ॥ मया निवेदितं तुभ्यं नारायणि नमोऽस्तु ते ॥ नारायण्यै० ॥ ताम्बूलं० ॥ सरस्वति प्रभारूपे बहुरूपे प्रदायिनि ॥ नीराजनं गृहाणेदं शाङ्कर्यै ते नमोऽस्तु ते ॥ शाङ्कर्यै० मंगळनीराजनम्० ॥ गौरीमिमा— इति गौर्यै० ॥ मन्त्रपुष्पम्० ॥ कामदे कामिनां नित्यं कांते सर्वमनोरमे ॥ शिवानन्दे सदा भक्त्या ते करोमि प्रदक्षिणम् ॥ शिवानंदायै० ॥ प्रदक्षिणम्० ॥ सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ॥ विद्यारंभं करिष्यामि सिद्धिर्भवतु मे सदा ॥ कामरूपिण्यै नमः ॥ नमस्कारं समर्पयामि ॥ अथार्घ्यं ॥ वाणी सरस्वती देवी वीणा-पुस्तकधारिणि ॥ गृहाणार्घ्यं मया दत्तं सरस्वति नमोऽस्तु ते ॥ सरस्वत्यै नमः ॥ इदमर्घ्यं ॥ १ ॥ वागीश्वरि नमस्तेऽस्तु नमस्ते भक्तवत्सले ॥ अशेषरूपसंयुक्ते दत्तमर्घ्यं गृहाण ते ॥ भक्तवत्सलायै० ॥ इदमर्घ्यं ॥ २ ॥

महाविद्ये महामाये नमस्ते ज्ञानरूपिणि ॥ नवरात्रौ नक्तभोजी अर्पयामि शिवप्रिये ॥ शिवप्रियायै० ॥ इदमर्घ्यं ॥ ३ ॥ अथ प्रार्थनं करिष्ये ॥ नमस्ते शारदे देवि काश्मीरपुरवासिनि ॥ त्वामहं प्रार्थयेन्नित्यं विद्यादानं च देहि मे ॥ १ ॥ पद्मपत्रविशालाक्षि पद्मकेसरवर्णिनि ॥ नित्यं पद्मालये देवि त्वं मां पातु सरस्वति ॥ २ ॥ नानारत्नधरां देवि जगन्मातरमंबिकां ॥ पूर्णेंदुवदनां देवीं भारतीं प्रार्थयाम्यहं ॥ ३ ॥ इति प्रार्थनं समर्पयामि ॥ ध्यायामीत्यादि पुनः पूजां कृत्वा यस्यस्मृत्येति पुजासमर्पणंकुर्यात् ॥

श्रीशारदाम्बार्पणमस्तु ॥ ॥ श्रीः ॥ * ॥ श्रीः ॥ *

इति कल्पोक्त शारदाष्टोत्तरशतनामपूजा विधिः ॥ श्रीः ॥

समाप्तम्

हें पुस्तक **गणेश गणप शास्त्री भावी** कर्कि, होन्नावर, उत्तरकानडा-यानीं उडुपि **प्रभाकर** मुद्रणालयांत प. नारायणप्रभु—ह्यांपासून मुद्रण करवून प्रसिद्ध केलें.

किं. ०–८–०.] [ट. ख. ०–०–६.

इति कल्पोक्त

॥ नवदुर्गासहस्रनामसंपूर्णम् ॥